On every elephant	प्रतिगजम्
Outside the forest	बहिर्वनम्
On the way	मध्येमार्गम्
In proportion to one's means	यथाविभवम्
In their respective places	यथाभागम्
Not leaving even a blade of grass	सतृणम्

(5) In translating the following, render 'with' by स (or सह), drop the suffix 'ed' at the end, and dispense with the relative pronoun, and the verb 'to be'.

Evil-hearted	दुष्टचेतस्	Red-coloured	अरुणवर्ण
Hot-headed	संरम्भशील	Bare-footed	अनावृतपाद
Long-tailed	दीर्घपुच्छ	Quick-sighted	तीक्ष्णदृष्टि
Thick-skinned	घनत्वच्	Narrow-minded	कृपण-क्षुद्र-चेतस्
Sharp-edged	तीक्ष्णधार	Public-spirited	विश्वजनीनवृत्ति

(a man) with his wife	सभार्यः
(the earth) with islands	सद्वीपा
(a thing) with the master	सनाथम्
(the door) with a bar	सार्गलः
(a man) with compassion	सकरुणः
(a man) with the family	सकुटुम्बः
(the moon) with the digits	सकलः
To whom the Ganges is flown	प्राप्तगङ्गः
By whom the water has been drunk	पीतोदकः
To whom a reward has been given	दत्तपारितोषिकः
From which fire has arisen	उद्भूतानलः

Whose sight is pleasant　　　　　　　　　प्रियदर्शनः
In which the jewels are many　　　　　　　बहुरत्ना

Note (1) Here we see

(*a*) that the clause is introduced by an oblique case of the relative pronoun, or its equivalent prepositional phrase.

(*b*) that the verb in each clause is 'to be' of incomplete predication.

and (*c*) that in the compound, the verb, 'to be' and the relative pronoun are not represented by separate words.

(2) An adjectival clause that is differently constituted should, if possible, be first reduced to the form described in (*a*) and (*b*) in the above note and then rendered by a compound in Sanskrit.

As examples, we may take the following.

1 (One) to whom the tail serves as a weapon
=whose tail is his weapon
=पुच्छप्रहरणः, लाङ्गूलायुधः

2 (One) who is accompanied by the bow
=whose companion is the bow
=चापद्वितीयः

2 (Those) that begin with Rama
=Of whom Rama is the first
=रामादयः

4 (That) which abounds in water
=in which water is copious
=प्रभूतजलम्

5 What proceeds from the sun
=whose origin is the sun
=सूर्यप्रभवः

6 Who equals the mind in velocity
=whose velocity is like (that of) the mind.
=मनोजवः, मानसचापलः

7 (One) who has a face similar to that of an elephant.
=whose face is similar to (that of) an elephant.
=गजमुखः

8 (One) who values honour=who looks upon honour as a treasure=whose honour is his treasure or wealth.
=मानधनः

Further examples from Second Book of Sanskrit.

(*a*)
1 Long-armed — दीर्घबाहु
2 Broad-chested — विशालवक्षस्
3 Slender-waisted — तनुमध्य
4 The lotus-eyed maid — पद्माक्षी कुमारी
5 The moon-faced damsel — इन्दुवदना कन्या

(*b*)
1 Whose love has been sought by celestial damsels.
2 Whose abodes are different by nature,
3 Who heard the account of महाश्वेता
4 Whose spirit is unfathomable
5 Who has obtained great fame by keeping his subjects contented.
6 Who has paid back a deposit.
7 Whose limbs were delicate.
8 Whose arm was adorned with an अङ्गद
9 Whose power was equal to that of Mountain महेन्द्र
10 Who by his prowess had destroyed his enemies.

The sentences under (*b*) may be represented as follows.—

	Connective	Subject	Copula	Complement.
1	Whose	love	has been	sought by celestial damsels.
2	Whose	abodes	are	different by nature.
3	By whom	the account of महाश्वेता	had been	heard.
4	Whose	spirit	is	unfathomable.
5	By whom	great fame	has been	obtained by keeping the subjects contented
6	By whom	a deposit	had been	paid back.
7	Whose	limbs	were	delicate
8	Whose	arm	was	adorned with an अङ्गद
9	Whose	power	was	equal to that of Mountain महेन्द्र
10	By whom	the enemies	had been	destroyed by means of his prowess.

Now we have to render the subject and the complement, each by a single word, whether simple or compound; so, we have

The account of महाश्वेता = महाश्वेतावृत्तान्तः

Great fame महायशस्

Sought by celestial damsels = दिव्याङ्गनाप्रार्थित

Different by nature निसर्गभिन्न

Obtained by keeping his subjects contented = प्रजारञ्जनाधिगत

Paid back प्रत्यर्पित

Adorned with an अङ्गद = अङ्गदालंकृत

Equal to (that of) Mountain महेन्द्र = महेन्द्राद्रिसमान

Destroyed by means of his prowess = वीर्यावसादित

Thus we have the following compounds:—

1 दिव्याङ्गनाप्रार्थितप्रणयः 2 निसर्गभिन्नास्पदे 3 श्रुतमहाश्वेतावृत्तान्तः 4 अगाधसत्त्वः 5 प्रजारञ्जनाधिगतमहायशाः 6 प्रत्यर्पितन्यासः 7 सुकुमारगात्री, कोमलाङ्गी 8 अङ्गदालंकृतभुजः 9 महेन्द्राद्रिसमानसारः 10 वीर्यावसादितविपक्षः

———:o:———

Note—As an exercise in the formation of compounds, render by compounds the Italicized expressions in English passages given further.

———

CHAPTER VI.

Lessons for translation into English.

LESSON I.

शृगालस्य चातुर्यम्

कस्मिंश्चिदरण्ये, खरनखरो नाम सिंहः प्रतिवसति स्म। स कदाचिद्भक्ष्यमन्विष्यन्, इतश्चेतश्चाभ्राम्यत्। परं न किंचिदाससाद। अथ क्षुधा पीडितः, सायं महागुहामेकां प्रविश्य, चिन्तितवान्। नूनमेतस्यां गुहायां, रात्रौ किंचित्सत्त्वमागच्छेत्। तदत्र निभृतास्तिष्ठामि। एवं तस्य तत्र स्थितस्य, निपुणको नाम तत्स्वामी जम्बूकः समायातः। स यावत्पश्यति तावत्सिंहस्य पदपद्धतिर्गुहायां प्रविष्टा, तस्य दृष्टिपथमायाता, न पुनर्निष्क्रान्ता। ततोऽचिन्तयत्। अहो विनष्टोऽस्मि। नूनमत्रान्तर्गतः केसरी वर्तते। तत्किं करोमि। क्व गच्छामि। अत्र तावदपरीक्ष्य प्रवेशो न कार्यः। एवं विचिन्त्य, द्वारि तिष्ठन्, आह्वातुमारब्धः। भो भो बिल, इति। एतस्मिन्, गुहाया उत्तरमनासाद्य भूयोऽभाषत। रे बिल, किमिदं त्वयावयोः समयो विस्मृतः। मया त्वं बहिःस्थितेन वक्तव्यः, त्वयाप्यहमाकारयितव्यः। ततो मयान्तः प्रवेशः कार्यः। इति। तद्यदि मां नाह्वयसि, ततोऽहं द्वितीयां गुहां गमिष्यामि। मृगपतिरपि तच्छ्रुत्वा चिन्तितवान्। नूनमेतज्ज्ञायते, यथा, एषा गुहा समायातस्यास्य सदाह्वानं करोति। अद्य पुनर्मद्भयात्तूष्णीमास्ते। तन्मयापि तावदयमाकारणीयः। येनायं प्रविश्य, मम भोज्यो भवेत्। एवं संप्रधार्य, तस्याह्वानमकरोत्। तदा कण्ठीरवरवस्य प्रतिशब्देन परिपूर्णा सा गुहा, दूरे स्थितानपि सत्त्वान्समत्रासयत्। तेन भृशं भीतः स निपुणकः। परं त्वासन्नान्मरणान्मुक्तोऽहमिति स हृष्टः पलायत। पलायमानश्च श्लोकमिममपठत्।

'अनागतं यः कुरुते स नन्दति
उपेक्षते यो ध्रुवमेष शोचति।

वनेऽत्र संस्थस्य जरा ममागता
बिलस्य वाणी न तु कर्णमागता ॥ १ ॥'

EXERCISE I.

Questions.

I. Transform or paraphrase.

खरनखरो नाम । भक्ष्यमन्विष्यन् । तस्य तत्र स्थितस्य । गुहाया उत्तरमनासाद्य । त्वया समयो विस्मृतः । यदि मां नाह्वयसि ततः । अनागतं यः कुरुते ।

II. Write notes on:—

(*a*) स्म following a verb of the present. (*b*) किम् + चित्.

III. Write the senses of the following words in the text. समय, सत्त्व, आ + ह्व Causal, परा + अय्, पद्धति.

IV. Solve and name the following compounds:— कण्ठीरवः, प्रतिशब्दः, खरनखरः, मृगपातिः.

LESSON II.

प्रश्नान्मुक्तिः

पृच्छकेन सदा भाव्यं नरेणापि विजानता ।
राक्षसेन गृहीतोऽपि प्रश्नान्मुक्तो द्विजः पुरा ॥

कुत्राचिद्वने, करालो नाम राक्षसः प्रतिवसति स्म । एकदा तेन भ्रमताटव्यां, कश्चिद् ब्राह्मणः समासादितः। ततस्तस्य स्कन्धमारुह्याऽब्रवीत् । भोः, अग्रे सरितं प्रति गम्यताम् । ब्राह्मणोऽपि भीत्या तमादाय प्रस्थितः । अथ, तस्य पादौ सुकुमारौ दृष्ट्वा, ब्राह्मणो राक्षसमपृच्छत् । भोः, किमीदृशौ ते चरणावतिकोमलौ । राक्षस आह । भो व्रतमस्ति । नाहमार्द्राभ्यामङ्घ्रिभ्यां रजोभिराकीर्णां भूमिं स्पृशामि । ततस्तच्छ्रुत्वा, आत्मनो मोक्षोपायं चिन्तयन्, विप्रस्तां स्रवन्तीं प्राप्तः । ततो राक्षसे-

नाभिहितम्। भो यावदहं स्नानं कृत्वा देवतार्चनं विधायागच्छामि, तावत्त्वयातः स्थानान्नान्यत्र गन्तव्यम्। तदाकर्ण्य द्विजोऽचिन्तयत्। नूनं समाप्ते देवतार्चने, मामेष भक्षयति। तद्द्रुततरं नद्याः पारं गच्छामि येनैष तामुत्तीर्य क्लिन्नाभ्यां पादाभ्यां मम पृष्ठं नानुधावेत्। तथानुष्ठिते, राक्षसः, मा व्रतं भङ्गमियादिति, तस्य पश्चान्न गतः। ब्राह्मणश्च क्षेमेण गृहं प्राप्नोत्॥

EXERCISE II.

I. Transform or paraphrase.—

नरेण पृच्छकेन भाव्यम्। राक्षसेनाभिहितम्। त्वया न गन्तव्यम्। समाप्ते देवतार्चने। मा व्रतं भङ्गमियात् इति।

II. Form derivatives from pronouns after the fashion of ईदृश from इदम्.

III. Give past participles of पृ, कृ, स्था, & आप्.

IV. Derive ब्राह्मण, सरित्, स्रवन्ती, and चरण.

V. Say why the suffix तर is not changed into तराम् in द्रुततरं गच्छामि?

LESSON III.

अर्धमूल्यम्

दुर्गवसतिः कश्चिद्राजन्यः, पुत्रविवाहोत्सवे, बन्धुवर्गं भोजयितुमैच्छत्। तत्र, नानाविधानि संपन्नानि खाद्यानि, बहुविधानि मधुराणि पेयानि, विविधानि रसवन्ति फलानि च, समाहृतानि। किंतु, अचिरोपशान्ताच्चक्रवातादुत्सन्नप्रायत्वात्संनिहितानामारामाणां, मृदुललितानि पचेलिमानि द्राक्षाफलानि नाधिगतानि।

अथ भोजनदिने प्रातरेव, कश्चित्फलविक्रयी, ध्रुवं दैवेन प्रेषितः, द्राक्षागर्भं करण्डमेकं शिरसा वहन्, दुर्गद्वारि प्राप्तः। आवेदितमात्रे

तस्यागमने, सर्वो दुर्गवासी जनो हर्षनिर्भरो बभूव। फलहस्तश्च स नरः, सपदि, सुहृज्जनपरिवृतं स्वामिनं प्रति नीतः। आलोकितमृद्वीकः स राजन्योऽवादीत्। अहो शोभनानि द्राक्षाफलानि। भद्र, मूल्यमेतेषां ब्रूहि सपदि गृहाण च, इति।

एतस्मिन् स पुरुषोऽब्रवीत्। देव नाहमेकमपि निष्कं ग्रहीष्यामि। न मे द्रविणेन कार्यम्। अनावृते मम पृष्ठे, पूर्णं कशाप्रहारशतमेव दीयमानं मया प्रार्थ्यते। एतदाकर्णयतो महानासीद्विस्मयः सपरिवारस्य तस्य सामन्तस्य। निवर्तस्वास्मादनुचितप्रार्थितादिति च, स पण्याजीवो नैकवारमनुशिष्टः। किंतु, तस्य मनो नान्यथाऽभवत्। एवमनुशासनस्य मोघतां वीक्ष्य, स प्रभुर्बभाषे। विचित्रवृत्तिरयं दृश्यते पुरुषः। भवतु। अस्माकं तु द्राक्षाफलान्यवश्यमपेक्षितानि। अतोऽस्माकमग्रतः, मृदु ताडयित्वा, मूल्यमस्मै प्रतिपाद्यतामिति।

तदनु, पञ्चाशति प्रहारेषु पातितेषु, स विक्रयवृत्तिरुच्चैरवोचत्। विरम्यतां विरम्यतां भोः। अस्मिन् कर्मणि मम कश्चित्संविभागी वर्तते, स चात्र भागमर्हति। एतन्निशम्याधिपतिर्जगाद। ही चित्रम्। ईदृशोऽपरोऽपि कश्चिद्वैधेयः, धरातलेऽस्मिन् वर्तते किम्। तात, कुत्र खलु ते सहायः। नामतो ब्रूहि। येन सपदि स समाहूयेत।

ततः पण्यवृत्तिरवादीत्। ननु, सोऽदूरत एव वर्तते। भवतः प्रतीहारभूमौ नियुक्तात्पुरुषादनन्योऽसौ। स हि, मया लप्स्यमानस्य मृद्वीकामूल्यस्यार्धं त्वदीयं भविष्यति, इति वचनात्पूर्वं, मह्यमन्तः प्रवेष्टुं नाददात्।

एतेन संजातकौतुकः स धनिको व्याजहार। अहो वैदग्ध्यं ग्रामीणस्यापि तव। शठत्वं च नागरिकस्यास्य दौवारिकस्य। अविलम्बितमानीयतामसौ सेवकवृकः। अस्मै खलु नयनिष्ठुरतां सुतरामास्थाय दीयतां विभागः। इति स्वामिवचनात्तत्क्षणमेव स प्रतीहारस्तत्रानीतः। अवशश्च सः, यथासमयोपनतं निग्रहरूपं स्वीयमंशं भेजे। अथ श्रीमता तेन, तस्य वृत्तिरपहृता, विक्रयवृत्तेश्च विचित्रः प्रसादो वितीर्णः।

EXERCISE III.

I. Transform or paraphrase.—

आरामाणामुत्सन्नप्रायत्वात् । आवेदितमात्रे तस्यागमने । अनुशासनस्य मोघतां वीक्ष्य । पञ्चाशति प्रहारेषु पातितेषु । सहायं नामतो ब्रूहि ।

II. Solve and name the following compounds:—
दुर्गवसतिः, बहुविधानि, अचिरोपशान्तः, चक्रवातः, उत्सन्नप्रायः, मृदुललितम्, आवेदितमात्रम्, निर्भरः, फलहस्तः, सुहृद्, नैकवारम्, अविलम्बितम्, सेवकवृकः and अवशः

III. Derive.—

दुर्ग, बन्धु, वर्ग, मधुर, आराम, सपदि, स्वामिन्, सामन्त, सहाय, वैधेय, वैदग्ध्य, ग्रामीण, and दौवारिक.

IV. Explain.

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥ १ ॥

V. Form past participles from पद्, क्रम्, शम्, and सद्.

VI. What are the potential participles of खाद्, and पा.

VII. (*a*) Distinguish between the genders (1) of द्वार् and द्वार, (2) of मित्र and अमित्र.

(*b*) What are the senses of वितृ and उत्तृ ?

(*c*) Supply the agent to विरम्यतां विरम्यताम्.

VIII. Give the meanings of संविभागिन्, तात, अवश, वृत्ति and विचित्र.

LESSON IV.

" कलहः स्याद्विनाशाय "

शकुनीनामिहार्थाय पाशं भूमावयोजयत् ।
कश्चिच्छाकुनिकस्तात पूर्वेभ्योऽनुश्रुतं मया ॥ १ ॥

तस्मिंस्तु शकुनौ बद्धौ युगपत्सहचारिणौ ।
तावुपादाय तं पाशं जग्मतुः खचरावुभौ ॥ २ ॥

तौ विहायः समाक्रान्तौ दृष्ट्वा शाकुनिकस्तदा ।
अन्वधावदनिर्विण्णो येन येन स्म गच्छतः ॥ ३ ॥

तथा तमनुधावन्तं मृगयुं शकुनार्थिनम् ।
आश्रमस्थो मुनिः कश्चिद्ददर्शाथ कृताह्निकः ॥ ४ ॥

तावन्तरिक्षगौ शीघ्रमनुयान्तं महीचरम् ।
श्लोकेनानेन कौरव्य पप्रच्छ स मुनिस्तदा ॥ ५ ॥

विचित्रमिदमाश्चर्यं मृगहन्प्रतिभाति मे ।
प्लवमानौ हि खचरौ पदातिरनुधावसि ॥ ६ ॥

शाकुनिक उवाच पाशमेकमुभावेतौ सहितौ हरतो मम ।
यदा तु विवदिष्येते तदा मे वशमेष्यतः ॥ ७ ॥

तौ विवादमनुप्राप्तौ पतगौ मृत्युगोचरौ ।
विगृह्य च सुदुर्बुद्धी पृथिव्यां संनिपेततुः ॥ ८ ॥

तौ युध्यमानौ संरब्धौ मृत्युपाशवशानुगौ ।
उपसृत्यापरिज्ञातो जग्राह मृगहा तदा ॥ ९ ॥

एवं ये ज्ञातयोऽर्थेषु मिथो गच्छन्ति विग्रहम् ।
तेऽमित्रवशमायान्ति विहंगौ कलहादिव ॥ १० ॥

संभोजनं संकथनं संप्रश्नोऽथ समागमः ।
एतानि ज्ञातिकार्याणि न विरोधः कदाचन ॥ ११ ॥

EXERCISE IV.

I. Transform or paraphrase.—

कलहः स्यात् विनाशाय । पूर्वेभ्योऽनुश्रुतं मया । प्लवमानौ हि खचरौ पदातिरनुधावसि ।

II. Derive:—शाकुनिक, विहायस्, निर्विण्ण and मृग.

III. Give the senses of.—
युगपत्, गोचर, संरब्ध, and ज्ञाति.

IV. Solve and name the following compounds:—
शकुनार्थी, विहगः, मृगहन्, मृगयुः, पदातिः, आश्चर्यम्, and अन्तरिक्षम्.

LESSON V.

विंशतिर्वृद्धवचनानि

' पठ-धारय-पालय '

1 सविनयं भाषस्व.

2 रथ्यायां दाक्षिण्यमवलम्बस्व। मार्गे गुरुणा समागच्छेश्चेत्तं प्रणम।

3 पथा चलन्प्रवयसामवकाशं दातुं पार्श्वतो याहि।

4 वासांसि सुबद्धं परिधेहि। तानि शुचीनि साधुबन्धानि सन्ति-चेत्तेषामल्पमूल्यत्वं रुचिरेतरत्वं वा मा चिन्तय।

5 शरीरशुद्धिमवेक्षस्व। करवक्त्रस्य निर्मलत्वं विधिविहितमिव पुरस्कारमर्हति। आपादशीर्षं कायशुद्धिरारोग्यस्य प्रथमं साधनम्।

6 गुरूणां वचनमुक्तमात्रमनुतिष्ठ। तान्द्विरादेशक्लेशं मा लम्भय।

7 आत्मनि यादृशीं वृत्तिं जनैः क्रियमाणामिच्छसि तादृशीं तेषु भज। एष खल्वनुत्तमो जीवितक्रमः।

8 परस्य चेतो मा कदाप्युद्वेजय। समाजे कस्याप्युपहासरतिर्मनसो नैष्ठुर्यं वदति।

9 सर्वेषु दयादाक्षिण्येन वर्तस्व। अपेशलं वचो मा वद। परुषं वा कर्म मा विधेहि।

10 अवाच्यवादान्वदतो नरान्धिक्कुरु। सर्वथा तथा प्रयतस्व यथा पाठशालायां रथ्यासु वा अपभाषितं नैव श्रूयेत।

11 सर्वेषां वस्तूनां स्थानानि कल्पय । तत्तद्वस्तु च तस्य तस्य स्थाने निधेहि।

12 दुर्जनसंसर्गादेकाकिनोऽवस्थानं वरम् ।

13 यत्खलु न्याय्यं कर्म तन्न्याय्यमित्येवानुतिष्ठ ।

14 कर्तव्यकरणस्य हेतोः पारितोषिकं मापेक्षस्व ।

15 यथाकालं सर्वाणि कर्माण्याचर । कार्यं कर्म सम्यङ्निर्वर्तय । तस्याननुष्ठानं तवैव गरीयसे क्लेशाय । क्षुद्रमपि कर्म समीचीनतया विधेहि । यत्खल्वनुष्ठेयं तत्सम्यगनुष्ठानमर्हति ।

16 सर्वदा सत्यं वद । तद्धि भाष्यमाणं धैर्यमादधाति, अनृतं पुनः कातर्यम् । तथा त्वया वक्तव्यं यथा तव वचसि न कोऽप्यप्रत्ययं करिष्यति । भूतार्थमपि व्याहरति मिथ्याभाषणशीले नरे जनो न विश्वसिति ।

17 पारितोषः संपदो विशिष्यते । वरं खलु स्वपरितुष्टस्य नरस्य पर्णशालायामपि जीवनं न पुनश्चिन्ताबहुला प्रासादवसतिः ।

18 लोभवृत्तिर्मा भव । स्वस्वानिर्विशेषं परस्वं रक्ष ।

19 पितरौ मानय । सततं सादरमविलम्बितं च तयोर्नियोगान्संपादय ।

20 ईश्वरं सर्वभावेन भज । सर्वभूतानि चात्मवत्पश्य ।

EXERCISE V.

I. Solve and name the following compounds:—

सविनयम्, प्रवयाः, करवक्त्रम्, आपादशीर्षम्, उक्तमात्रम्, अनुत्तमः, पाठशाला, यथाकालम्, and निर्विशेषम्.

II. Derive:—

रथ्या, मार्गः, न्याय्यम्, पारितोषिकम्, and पितरौ.

III. Form abstract nouns from:—

दक्षिण, अरोग, निष्ठुर, धीर, and कातर.

IV. Parse the word सुबद्धम्.

V. Give the special senses of the following words in the text.
विधि, पुरस्कार, भज्ञ, वद्, भूत (in भूतार्थ), स्व and अवकाश.

VI. Transform or paraphrase.—

(1) तान् क्लेशं मा लम्भय. (2) दुर्जनसंसर्गादेकाकिनोऽवस्थानं वरम्. (3) सर्वभूतानि आत्मवत् पश्य.

VII. Give an adjective of the superlative degree that has no corresponding form for the positive.

VIII. Illustrate the use of न पुनः

IX. State how अनुत्तम comes to mean nearly the same as उत्तम, and cite a similar pair of words from English.

LESSON VI.

महर्षिरगस्त्यः

महर्षेरगस्त्यस्य भूयान्माहिमा पुराणेषु वर्ण्यते। ऋग्वेदे, स च वसिष्ठश्च, मित्रावरुणयोरपत्ये, इति विश्रुतौ। तेन च, मैत्रावरुणी, इति ख्यातौ। अगस्त्यो घटादेकात्प्रादुर्भूत इति, घटोद्भवादिभिरपि नामभिः श्रूयते।

कदाचिद्विन्ध्याद्रिः, परामुन्नतिमवाप्य, सवितुः पन्थानमरुणत्। तमेष मुनिरवनमितवान्,। एकदा, कालेया नाम दानवाः, वृत्रेणाधिष्ठिताः, इन्द्रेण सहायुध्यन्त। दधीचेर्मुनेरस्थिभिर्निर्मितेन वज्रेण, वासवो वृत्रमन्यांश्च बहून्राक्षसान्हतवान्। ततोऽपरे सागरं प्रविष्टाः। तस्मान्नक्तं बहिरागत्य, ते मुनीन्भृशं पीडयांचक्रुः। अगस्त्यस्याप्याश्रमस्तैरुत्सादितः। अथ, तेषां प्रत्यपकाराय शक्रस्य चोपकाराय, सोऽब्धिं पीत्वा, तांस्ततो विद्रावयांबभूव। येन, स पीताब्धिरित्याहूयते।

विन्ध्यस्य दक्षिणतः, कुञ्जरं नाम शैलं, लोपामुद्रया गृहिण्या सहैषोऽध्यवसत्, इति रामायणे कीर्तितम्। दक्षिणस्यां दिशि च, जनानर्दयन्ति बहूनि रक्षांसि, स निगृहीतवान्। आतापिर्वातापिरिति भ्रातरौ

निशाचरौ, छलेन बहूंस्तापसान्व्यापादयताम् । तयोर्वातापिं मेषरूपमास्थितं, भ्रात्रा च पक्त्वा भोज्यत्वेनोपहृतं, एष ऋषिर्जठरेऽजारयत् । आतापिमपि, स्वस्य नेत्राग्नौ शलभतामनैषीत् । सीतया लक्ष्मणेन च सह, काननानि चरन्तं राघवं, असावातिथ्येन संभावयति स्म । तस्य क्षेममभ्युदयं च वाञ्छन्, भृशमुपाकरोत् । तस्मै च, वैष्णवं धनुरददात् । वनान्निवृत्तेन च तेन सहायोध्यां जगाम । कदाचित्स्वर्गस्याधिपत्येनोद्धतं नहुषं, अयमेव, स्वेन हुंकारेण दिवोऽपातयत्, सर्पतां चानयत् । ततः शरणमागतं तं, स्वेन रूपेण संयोजयांचकार।

असौ द्विजवरो विचक्षणः कारुणिको जनानां हितकर्ता धनुर्वेदे चासामान्यकौशल आसीत् । दक्षिणापथ आर्याणां वसतेरसौ प्रधानः प्रवर्तको बभूव ॥

EXERCISE VI.

I. Give the forms for the remaining degrees of:—
गरीयस्, क्षुद्र, उत्तम, भूयस्, and वसिष्ठ.

II. Dissolve and name the following compounds:—
ऋग्वेदः, विन्ध्याद्रिः, निशाचरौ, द्विजवरः, and अब्धिः.

III. Give the absolutives of:—
धिक्कृ, प्रादुर्भू, and पच्.

IV. Give the cognate forms of the Perfect for:—
अरुणत्, अवनमितवान्, अयुध्यन्त, हृतवान्, अध्यवसत् and निगृहीतवान्.

V. Derive:—
कारुणिक, सामान्य, and कौशल.

VI. Transform or paraphrase.—

आश्रमस्तैरुत्सादितः । स पीताब्धिरित्याहूयते । शरणमागतः ।

VIII. Explain (*a*) the term सागर as applied to 'sea' (*b*) अग्नौ शलभतां नी.

VIII. Give the antonyms of अपकार, सकल and ग्रामीण.

IX. Parse अर्दयन्ति in जनानर्दयन्ति रक्षांसि.

X. Give the sense of छल in the passage.

XI. State the associations involved in the derivation of the term 'कौशल.'

LESSON VII.

मेघदूतस्य संविधानकम्

श्रूयते खलु पुराणेषु, यथाऽलका नाम कुबेरनगरी, हिमालयस्योत्तरतो निविष्टेति । अत्र प्रियाहृतमानसः कश्चिद्यक्षः, धनेश्वरस्य सेवायां प्रमादं कृतवान् । येन कुपितोऽसौ, तं शशाप, यां खलु कान्तां चिन्तयता त्वया, मम सेवायामपराद्धं, तयैव, वर्षं यावद्वियुक्तो भवेति ॥

अनेन शापेन नितरां खिन्नमनाः सः, विरहदिवसान्कथं कथमप्यतिवाहयितुं, रामगिर्याश्रमे वसतिमकार्षीत् । अत्र गुरुणा दुःखेन, कतिचिन्मासास्तेन नीताः । अथ, प्रवृत्त आषाढे मासि, कानने विचरता तेन, जलबहुलनीलः कश्चिन्मेघः शैलशिखरावलम्बी लक्षितः । तदा, प्रथममेव वनिताविरहविकलमस्य चेतोऽधिकतरं पर्याकुलं जातम् ॥

अथाऽसौ जलदः, मया दूतीकृत्य प्रियां प्रति प्रेषितश्चेत्, सा ततो मम कुशलं विज्ञाय, प्राणान्धारयितुमलं स्यादिति स चिन्तयामास । ततः सः, तं वारिदं कुशलं पृष्ट्वा, सादरैः प्रीतिवचनैः स्वानियोगानुष्ठानाय प्रार्थितवान् । तदनु तेन, अलकामार्गो व्याख्यातः । अस्मिन्व्याख्याने, मार्गे स्थितस्य तस्य तस्य जनपदस्य संनिवेशलोकाचारादिविशेषाणां कवेः कालिदासस्य विज्ञानं सम्यक्स्फुटीभूतं, काव्यस्यासामान्यमुत्कर्षमादधाति । मार्गकथनादनन्तरं, तेन स्वीयं नगरं, भवनं, भावगम्या च गृहिण्या विरहावस्था वर्णिता । अन्ते च, पेशलैर्वचोभिर्भार्यायाः संदेशः कथितः ॥

मेघः खल्वत्र दूतत्वेन कल्पितः, इतीदं काव्यं मेघदूतमित्युच्यते । पूर्वमेघस्य

'धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः।
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।'

इति श्लोकपादयोरन्तिमादिमशब्दाभ्यां घटिता, 'मेघसंदेश' इति संज्ञा, कविनैवात्रोपनिबद्धा, इति कृत्वा, कैश्चिदस्य काव्यस्य कल्प्यते॥

श्रीमान्राघवः, जानकीं प्रति, हनूमन्तं ससंदेशं प्रहितवान्, इति लक्ष्यीकृत्य, कविरिदं काव्यं कर्तुं प्रवृत्तः, इति कैश्चिदुत्प्रेक्ष्यते। एषोत्प्रेक्षा च, उत्तरमेघे

'इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा' इत्युपमया दत्तहस्ता उपपन्नेवाभाति।

EXERCISE VII.

I. Dissolve and name the following compounds.—
मेघदूतम्, जलबहुलनीलः, अनन्तरम्, पटुकरणाः and उन्मुखी.

II. Illustrate the use of यावत् (preposition).

III. Give the noun uses of the past participles of.—
वृध्, जन्, कम्, अद्, विद्, वा, and वन्.

IV. Transform or paraphrase.—

प्रवृत्ते आषाढे मासि। दूतीकृत्य। स्वनियोगानुष्ठानाय प्रार्थितवान्।

V. (*a*) Derive शैल. (*b*) Give the difference of sense if any between:— (1) मनस् and मानस (2) रक्षस् and राक्षस (3) तपस् and तापस (4) सरस् and सारस (5) पयस् and पायस.

VI. Give the associations involved in the derivation of विकल.

VII. State the peculiarity of gender of the compound जनपद

VIII. Derive adjectives expressive of place from आदि and अन्त

IX. Give special signification of मत् in हनूमत्.

X. Give the past participles of.—
खिद्, बन्ध्, वृत्, and शास्.

LESSON VIII.

कर्कोटकविनोदः

अत्रान्तरे स क्षितिपो नलस्तस्मिन्वने निशि ।
प्रावृतार्धपटो दूरं गत्वा दावाग्निमैक्षत ॥ १ ॥
"भो महासत्त्व यावन्न दह्येहमबलोऽमुना ।
अपसारय मां तावद्दावाग्नेर्निकटादितः" ॥ २ ॥
इत्येतद्वच आकर्ण्य दत्तदृष्टिर्ददर्श सः ।
आबद्धमण्डलं नागं नलो दावानलान्तिके ॥ ३ ॥
फणारत्नप्रभाजालजटिलं वनवह्निना ।
गृहीतमिव तेनोग्रहेतिहस्तेन मूर्धनि ॥ ४ ॥
उपेत्य कृपयांसे तं कृत्वा नीत्वा च दूरतः ।
त्यक्तुमिच्छति यावत्स तावन्नागोऽब्रवीत्स तम् ॥ ५ ॥
स्फुटं दश पदानि त्वं गणयन्नय मामितः ।
ततः स प्रययावेवं पदानि गणयन्नलः ॥ ६ ॥
एकं द्वे त्रीणि चत्वारि पञ्च षट् सप्त शृण्वहे ।
अष्टौ नव दशेत्युक्तवन्तमुक्तिच्छलेन तम् ॥ ७ ॥
नलं स्कन्धस्थितो नागो ललाटान्ते ददंश सः ।
तेन ह्रस्वभुजः कृष्णो विरूपः सोऽभवन्नृपः ॥ ८ ॥
ततोऽवतार्य स्कन्धात्तं स राजा पृष्टवानहिम् ।
को भवान्का कृता चेयं त्वया मे प्रत्युपक्रिया ॥ ९ ॥
एतन्नलवचः श्रुत्वा स नागः प्रत्युवाच तम् ।
राजन्कर्कोटनामानं नागराजमवेहि माम् ॥ १० ॥
दंशो गुणाय च मया दत्तस्ते तच्च वेत्स्यसि ।
गूढवासे च वैरूप्यं महतां कार्यसिद्धये ॥ ११ ॥

गृहाण चाग्निशौचाख्यमिदं वस्त्रयुगं मम ।
अनेन प्रावृतेनैव स्वं रूपं प्रतिपत्स्यसे ॥ १२ ॥

इत्युक्त्वा दत्ततद्वस्त्रयुगे कर्कोटके गते ।
नलस्तस्माद्वनाद्गत्वा क्रमेण प्राप कोशलान् ॥ १३ ॥

EXERCISE VIII.

I. Dissolve and name the following compounds.—

अर्धपटः, आबद्धमण्डलः, विरूपः. and वस्त्रयुगम्.

II. Illustrate the uses of यावत् as a conjunction.

III. Derive जटिल, रत्न and हेति, and give five derivatives, ending in त्र, obtained from roots.

IV. Transform or paraphrase.

दत्तदृष्टिर्ददर्श सः। नृपो विरूपोऽभवत्। यावन्न दह्येहं तावदेव मामपसारय ।

V. Give the sense of अन्त (in ललाटान्त).

VI. Parse the word वेत्स्यसि.

VII. Justify, with an historical illustration, the statement, गूढवासे च वैरूप्यं महतां कार्यसिद्धये ।

VIII. Give the special name of the phrase अनेन प्रावृतेन.

IX. What form is दश ?

X. Give the forms of the accusative of the first ten numerals in the neuter.

LESSON IX.

कर्णचरितम्.

कर्णः, कुमारिकाभावेन पितृगृहे वसन्त्यां कुन्त्यां, सूर्यमन्त्रप्रभावेण जातः। तदा जनापवादभीता सा, जातमात्रं तं स्रवन्त्यां तत्याज। स्रोतसा नीयमानः स कुमारः, आधिरथेन नाम धृतराष्ट्रस्य सारथिना

प्राप्तः, भार्याया राधायाश्च हस्ते पुत्रत्वेन समर्पितः। तया च जातनिर्वि-शेषं संवर्धितः। येन सः, सूतपुत्रः, राधेयः, इत्यादीः संज्ञा वहति ॥

यौवनमापन्नः सः, सुयोधनेन सौहार्दादङ्गराज्येऽभिषिक्तः। स्वीयैरुदारचरितैश्च, स दातृणामुपमानतां ययौ। कदाचिन्निजमन्त्रपठन-संभवं कुन्तीतनयमर्जुनमनुग्रहीतुकाम इन्द्रः, द्विजवेषं विधाय, अर्थि-भावेनागत्य, तस्मात्सहजानि कवचकुण्डलान्यपजहार। तस्मै च प्रत्युप-चिकीर्षुर्दिव्यां शक्तिं ददौ ॥

अस्त्रविद्यायाः परं पारं जिगमिषुरसौ विकर्तनकुमारः, क्षत्त्रान्तकं परशुरामं द्विजच्छद्मनोपतस्थौ। तस्माच्च धनुर्वेदमधिजगाम। कदा-चिन्निद्रातुरो भार्गवः, शिष्यस्य कर्णस्याङ्के शिरो निधाय सुप्तः। अत्रापि, अर्जुनस्योत्कर्षं संपादयिष्यन्मघवा, भ्रामरं रूपमास्थाय, तस्याङ्कं दार-यामास। तदा दीर्यमाणाङ्गोऽपि कर्णः, गुरोर्निद्राभङ्गं रक्षन्नचलः स्थितः। अथ सुप्तोत्थितो जामदग्न्यः, शिष्यशरीरे शोणितप्रवाहं वीक्ष्य, व्रण-वेदनाक्षमं कर्णस्य कर्कशं क्षत्रियत्वं विज्ञाय, तस्य कैतवेन कोपितः शापं ददौ, यथा, मदभ्यस्ता विद्या, त्वां कार्यवेलायां नोपस्थातेति। अन्यदा, मृगयां चरन् सः, प्रमादवशात्कस्यचिद्विप्रस्य गां जघान। तदा, धरेयं, संग्रामे व्यसनोपद्रुतस्य तव रथचक्रं ग्रसिष्यते, इति शाप-स्तस्मै द्विजातिना दत्तः ॥

एवं वर्मत्यागशापदोषादिभिर्मन्दीकृतोरुतेजसाऽपि तेन, पाण्डवैः सह संपराये, भीष्मद्रोणयोः पश्चात्सेनापतिपदे वर्तमानेन, दिनत्रयं यावत्समरभारः सोढः। अन्ते च, भूमिग्रस्तस्यन्दनाङ्गः सः, अर्जुनेन स्वर्लोकं प्रापितः।

असौ भूयसा दानशौण्डस्तेजस्वी सत्यसंधश्चासीत्। अत एव सौहार्दयन्त्रितः सः, शकुनिद्वितीयः, कौरवराजेन सह, तद्विपक्षाणां पाण्डवानां विघाताय, तांस्तान्कपटप्रयोगान्कल्पयामास। महोपकारि-णश्च धार्तराष्ट्रस्य, प्राणव्ययेनानृण्यं जगाम ॥

EXERCISE IX.

I. **Dissolve and name the following compounds.—**
जातमात्रः, इत्यादयः, अनुग्रहीतुकामः, सहजानि, कवचकुण्डलानि, द्विजातिः, मन्दीकृतम्, सत्यसंधः, शकुनिद्वितीयः, विपक्षः, महोपकारी and प्राणव्ययः.

II. Derive.—
यौवन, भ्रामर, कैतव, पाण्डव, कौरव, धार्तराष्ट्र and आनृण्य.

III. **Transform or paraphrase.—**
यौवनमापन्नः । स दातॄणामुपमानतां ययौ । जिगमिषुः । तेन भारः सोढः ।

IV. State the change of compound in the equivalent phrases द्विजवेषं विधाय and द्विजवेषो भूत्वा.

V. Parse संपादयिष्यन् and भूयसा in the above story.

VI. Give the meanings of.—
रक्षन् (in गुरोर्निद्राभङ्गं रक्षन्), यन्त्रित and तद् तद्.

LESSON X.

श्रीमङ्गलागौरी.

PART I.

आसीदट्टपट्टं नाम नगरम् । तत्र द्विज एको न्यवसत् । तस्य पुत्रो न बभूव । तस्मिन्नेव नगरे भिक्षुरेको वसतिं चकार । भवनाद्भवनं भिक्षार्थं भ्रमन् सः, यदा तस्य विप्रस्य गृहमयासीत्तदा, 'आलक्षय दानफलम्' इत्युक्त्वा, भिक्षामगृहीत्वैव ततोऽचालीत् । एतदसकृन्निरूपितवती तत्पत्नी प्रतिवेशिन्यै कथयामास । सा तामुपादिशत् । यथा, त्वं कृतशुद्धस्नाना द्वारस्य पश्चान्निभृतं स्थित्वा, भिक्षां याचमानस्यैव तस्य पात्रे सहसा दधिभक्तं त्यज, इति । अन्येद्युः, तया तदनुष्ठितम् । ततो भिक्षावृत्तिस्तडागमेकं प्राप्य, तस्य तीरे समुपविष्टः, दध्यन्नस्य मुष्टिमेकां स्वमुखे क्षिपति, अन्यां च जले मत्स्येभ्यो विसृजति, व्याहरति च, 'खादितं बाधते त्यक्तं शपत्यन्नमसंततेः' । इति ॥

अत्रान्तरे, यदृच्छया प्राप्तेन, अपुत्रेण तेन विप्रेण, स भिक्षाजीवोऽनुयुक्तः । किं भोस्ते चिकीर्षितमित्थमाचरतः । एतस्मिन्नपुत्रस्यान्नस्य स्पर्शेन 'दूषितं मे भिक्षाभाजनम्' इति तेन कथिते, द्विजन्माप्राक्षीत् । अप्यास्ति कश्चिदुपायोऽपत्यावाप्तेः । तापसः प्रोवाच । संनिहितेऽस्मिन्सुरालये, भगवतीमम्बां तपसा तोषयन्नरो दृष्टसंतानो भवेदिति । ततो गृहं प्रत्यागत्य, कुटुम्बिन्यानुमोदितः सोऽपत्यार्थी, द्वादश समाः, दाक्षायणीमनन्यमानसः समाराधयामास । अथ निशि सा स्वपतस्तस्य प्रादुर्भूता । आसन्नस्याम्रतरोः फलं गृहाण, गृहिण्या च समं तद्भक्षय, येन जनिता तव सुतः, अतीव मेधावी, किंतु षोडशाब्दायुः, इति वदन्त्येव साऽदर्शनं ययौ ॥

प्रभाते प्रबुद्धः सः, विषादानन्दयोर्मध्ये वर्तमानः, फलमादाय, भवनं प्राप्तः । तच्च फलं, भार्यया सार्धं संविभज्य भुक्तवान् । प्राप्ते काले, सा सुतमसूत । तस्याल्पायुष्ट्वस्य हेतोः, नातिप्रमनाः स विप्रः, तस्य चूडाकरणादिषु संस्कारेषु मन्दादरोऽपि, उपनयनस्यावश्यानुष्ठेयतां स्मरन्, यथाकालं तं विधिनोपनीय, सावित्रीमुपदिदेश । शास्त्राणि चाध्यापयामास । अथ समाप्तप्राये पञ्चदशे वत्सरे, नन्दननिधनदर्शनदुःखं परिहर्तुकामः सः, तं काशीं प्रति प्रस्थितेन मातुलेन सार्धं प्रेषयासास ॥

EXERCISE X.

I. Dissolve and name the following compounds :—

अदृष्टपद्दम्, असकृत्, दधिभक्तः, अन्येद्युः, यदृच्छा, नातिप्रमनाः, समाप्तप्रायम्.

II. With the help of a compouud, express as a simple sentence, the following.—

तत्र द्विज एको न्यवसत्, तस्य पुत्रो न बभूव ।

III. Transform or paraphrase.—

भवनाद्भवनम् । भिक्षामगृहीत्वैव । तया तदनुष्ठितम् ।

IV. Derive.—संतति, गृहिणी, कुटुम्बिनी, मेधाविन्, अल्पायुष्क and सावित्री.

V. Parse.—निरूपितवती, सहसा, and अप्राक्षीत्.

V. Give the corresponding masculine for पत्नी.

VI. Give the meaning of प्रतिवेशिन्.

VII. Distinguish between स्नान and शुद्धस्नान.

VIII. Illustrate the use of पश्चात् (prep.)

IX. Express as a complex sentence तत् खादितं बाधते.

X. State the grammatical peculiarity of the word समा.

XI. What does the derivation of the word अब्द (year) teach us?

LESSON XI.

श्रीमङ्गलागौरी

PART II.

अथ भागिनेयेन सह चलितः सः, किंचिन्नगरमागत्य, शिवमन्दिरे शूलिनं सर्वभावेन भजन्तीं पुण्यलक्षणां क्षितिपकन्यां दृष्ट्वा, किमपि मनसा विभावयन्, राजकुलमाससाद। तत्र च, पार्थिवेन स्वागतेनाभिनन्दितो बभाषे । भोः, मत्प्रार्थितं पूरयितुं प्रतिजानीषे चेदेतदातिथ्यं स्वीकरोमि । ततः, धनेनार्थिनीयं नित्यं दारिद्र्यदुर्गता द्विजातिजातिरित्यालोक्य, स क्षितीश्वरः, तथेति तद्वचः प्रतिजग्राह । अथ भोजनमनु, सुखस्वापेन विनीताध्वखेदं तं, महीपतिर्मनीषितं पप्रच्छ। सोऽकथयत् । भोः सत्यसंध नरदेव, अस्मै मम भागिनेयाय भार्यार्थे स्वतनयां देहि । इति । एतेन तस्यानुचितप्रार्थनेन विमनायमानोऽपि 'नृपतिः सन्नपि प्रतिश्रुतं न कृतवान्' इति वाच्यदर्शनात् स दुहितरं यथाविधि विप्रपुत्रेण योजयामास ॥

अनन्तरं पतिश्वशुराभ्यां सार्धं, वधूरपि विश्वनाथनगरीं प्रयाता। तत्र वसतां तेषां, श्रावणो मासः प्रवृत्तः। अथेन्दुवासरे श्वशुरात्पूजासंभारानवाप्य, शिवाऽवियुक्तायै शिवायै तण्डुलमुष्टिमर्चनापूर्वं प्रकीर्य प्रार्थयांचक्रे। यदवियोगोऽस्तु मे नाथेनाजीवितम्। इति। अथ प्रभाते मङ्गलवासरे, मङ्गलागौरीं प्रभूतैः पुष्पसंभारैरभ्यर्च्य याचितवती॥

मङ्गलं मङ्गलानां त्वं नमस्ते गौरि मङ्गले।
भर्तुरायुर्वर्धयाम्ब सौभाग्यं विनयं च मे॥ १॥

इति। निशि च सा देव्याः पुरतः शयनं चकार। तस्यामेव रात्रौ, तस्याः पत्युः षोडशं हायनं समाप्तिमगमत्। तस्य प्राणापहाराय च, कालप्रेरितः कृष्णसर्पः, करधार्ये दीपिकाधारभाजने निशीथसमयं प्रतीक्षमाणः, निभृतं स्थितः। देव्या पुनः, निद्रां गता सा बोधिता, यदुत्तिष्ठ वत्से, वाससा च करपात्रस्य मुखबन्धं विधेहि। इति। तया च तत्सपद्याचरितम्। पवनाशनश्च बहिर्गन्तुमलभमानः, पवननिरोधात्तत्रैव पञ्चत्वं गतः। येन कुमारस्याकालनिधनं परिहृतम्॥

अथ काशीयात्रां समाप्य, त्रयोऽपि स्वग्रामं गताः। पुत्रस्य पञ्चत्वमुद्दिश्य शोककर्शितौ पितरौ च नन्दयांचक्रुः। इदं शिवगौरीप्रसादस्य फलं, स च स्नुषाभक्तिनिबन्धनः, इति ज्ञात्वा श्वशुरौ तस्यां स्नेहोत्तरां वृत्तिं चक्रतुः। एवं देवताप्रसादात्पुत्रलाभः, अपमृत्युपरिहारः, गुरुजनादरः, इत्यादीनि श्रेयांसि सुलभानि। तानि तदुत्थानि सर्वानुपतिष्ठेयुरित्याशास्य विरम्यते मया॥

EXERCISE XI.

I. **Derive.**—भागिनेय, विमनायमान, and सौभाग्य.

II. **Solve and name the following compounds.**—
इन्दुवासरः, शिवावियुक्ता, अर्चनापूर्वम्, आजीवितम्, सपदि, भक्तिनिबन्धनः, स्नेहोत्तरा and तदुत्थानि.

III. **State in particular terms what is meant by** किमपि **in** किमपि मनसा विभावयन्.

IV. Give the meanings of.—

प्रतिज्ञा, खेद (in विनीताध्वखेद), अर्थ (in भार्यार्थे) and निशीथ.

V. **Transform or paraphrase.—**

धनेनार्थिनी । तत्र वसतां तेषाम् । मया विरम्यते ।

VI. Explain पञ्चत्वं गम्.

VII. Illustrate the use of अनु (preposition).

VIII. Explain the origin of the term दुहितृ as applied to a daughter.

IX. State the propriety of 'विनयं' after 'सौभाग्यम्' in the stanza.

LESSON XII.

बैडालं व्रतम् ।

धर्मध्वजः पापरतेर्यस्य ध्वज इवोच्छ्रितः ।
प्रच्छन्नानि च पापानि बैडालं तस्य तद् व्रतम्॥ १ ॥

मार्जारः किल दुष्टात्मा निश्चेष्टः सर्वकर्मसु ।
ऊर्ध्वबाहुस्तपश्चक्रे गङ्गातीरे कदाचन ॥ २ ॥

अथ दीर्घस्य कालस्य तं देशं मूषका ययुः ।
निर्दम्भास्य तपस्येति श्रद्दधाना मिथोऽब्रुवन् ॥ ३ ॥

बहुमित्रा वयं सर्वे तेषां नो मातुलो ह्ययम् ।
रक्षां करोतु सततं बालवृद्धस्य सर्वशः ॥ ४ ॥

उपगम्य तु ते सर्वे बिडालमिदमब्रुवन् ।
पाह्यस्माञ्शत्रुतो भद्र त्वं हि धर्मे व्यवस्थितः ॥ ५ ॥

एवमुक्तस्तु तैः सर्वैर्मूषकैर्नष्टबुद्धिभिः ।
प्रत्युवाच ततः सर्वान्मूषकान्मूषकान्तकृत् ॥ ६ ॥

द्वयोर्योगं न पश्यामि तपसो रक्षणस्य च ।
अवश्यं तु मया कार्यं वचनं भवतां हितम् ॥ ७ ॥

भो नाहं गमने शक्तो वार्द्धक्याद्विकलेन्द्रियः ।
सोऽहं नेयः सदा ताता युष्माभिः सरितस्तटम् ॥ ८ ॥

तथेति ते प्रतिज्ञाय मूषका हर्षनिर्भराः ।
वृद्धबालमथो सर्वं मार्जाराय न्यवेदयन् ॥ ९ ॥

ततः स पापो दुष्टात्मा मूषकान् भक्षयन् रहः ।
पीवरश्च सुवर्णश्च दृढबन्धश्च जायते ॥ १० ॥

ततस्ते मूषकाः सर्वे समेत्यान्योन्यमब्रुवन् ।
मातुलो वर्धते नित्यं वयं क्षीयामहे भृशम् ॥ ११ ॥

ततः प्राज्ञतमः कश्चिड्डिण्डिको नाम मूषकः ।
अब्रवीद्वचनं तत्र मूषकाणां महागणम् ॥ १२ ॥

गच्छतां वो नदीतीरं सहितानां विशेषतः ।
पृष्ठतोऽहं गमिष्यामि मातुलेन सहालपन् ॥ १३ ॥

साधु साध्विति ते सर्वे पूजयांचक्रिरे तदा ।
आदृता अन्वतिष्ठंश्च डिण्डिकस्य वचोऽर्थवत् ॥ १४ ॥

मार्जार इदमज्ञात्वा डिण्डिकं भुक्तवान् पथि ।
अथ ते सहिताः सर्वे मन्त्रयामासुरञ्जसा ॥ १५ ॥

न मातुलो धर्मकामो गूढहिंसापरायणः ।
न मूलफलभक्षस्य विष्ठा भवति लोमशा ॥ १६ ॥

अस्य गात्राणि वर्धन्ते गणो नः परिहीयते ।
नदीकूलमितो गत्वा प्रत्यायातो न डिण्डिकः ॥ १७ ॥

एतच्छ्रुत्वा वचः सर्वे मूषका विप्रदुद्रुवुः ।
बिडालोऽपि स दुष्टात्मा जगामाशु यथागतम् ॥ १८ ॥

EXERCISE XII.

I. Derive:—बैडाल, गङ्गा, मूषक, वार्धक्य, and लोमश.

II. Solve and name the following compounds:—
धर्मध्वजः, पापरतिः, निर्दम्भा, बह्वमित्राः, बालवृद्धम्, सुवर्णः, गूढहिंसापरायणः, and यथागतम्.

III. Give the senses of ध्वज (in धर्मध्वजः), साधु, and अर्थवत्.

IV. Transform or paraphrase.
दीर्घस्य कालस्य । सर्वे बिडालमिदमब्रुवन् । नाहं गमने शक्तः । अहं युष्माभिस्तटं नेयः । गच्छतां वो नदीतीरम् ।

V. Give four derivatives ending in शस्.

VI. Parse कार्यं (in कार्यं वचनं भवतां हितम्), क्षीयामहे, आदृताः, अञ्जसा and परिहीयते.

VII. Give the past participles of छद्, गुह्, नश्, स्था and अनुशास्.

LESSON XIII.

वरं साम न पारुष्यम्

कदाचिच्छीततौ प्रभातवेलायां, तपनपवनयोरहमेव त्वत्तो गरीयानिति वदतोः, महान्संघर्षो जातः । रंहसा कम्पितवृक्षो वातोऽवदत् । पश्य, ममांशसंभूतेन भीमेन किं कृतम् । मात्रा सहिताः सर्वे पाण्डवा जतुगृहात्क्षेमेण निर्गता इत्यत्र स एव हेतुः । विराटभवने सैरन्ध्रीभावेन सेवमानां याज्ञसेनीं कामयमानः, राजबन्धुत्वाज्जातदर्पो मुषितविवेकश्च कीचकः, तेनैव भूमिवर्धनो विहितः । भ्रातृशतपरिवृतो भीष्मादिसहायः कौरवनाथोऽपि, तेनैव यमक्षयं नीतः ॥

एतस्मिन्नाविष्कृतमयूखमन्दहासो हरितहयो बभाषे । त्वं तावद्बलवान्खलु । परं ममापि तेजसः कोऽपि महिमा । मज्जातजातो युधिष्ठिरः, धर्मपराणामादर्शः, समाश्रयः समतायाः, निबन्धनं सत्यस्य, सागरः करुणायाः, निवासः सत्त्वस्य । असामान्यगुणोत्कर्षः सः,

पुरातनानां नरेश्वराणां धुरि कीर्तितः। त्वदपत्यस्य साहसैकरसिकस्यापि स वन्द्यः। एवं हतवचसा समीरणेन भणितम्। किं वाक्कलहेन । चक्षुर्वै सत्यम् । एतस्य पुरः प्रस्थितस्य पान्थस्य कन्थापनयने कः समर्थ इति पश्यावः॥

यावत्स इत्थं वदति, तावदेव सर्वतः प्रवातश्चक्रवातः । तेनाहतः सोऽध्वगः, कन्थां वातवेगेन स्रंसमानां दृढतरमेव परिदधौ । इत्थं मोघशक्तिं वातमपसार्य, उष्णधाम्ना भास्करेण सुखोष्णा रश्मयश्च विकीर्णाः पथिकेन च शीतनिवारणयत्नस्य पुनरुक्ततां वीक्ष्य, भारभूतश्चीरपटः परित्यक्तः। येन सिद्धं सवितुः प्राधान्यम्। अतोऽहं ब्रवीमि। वरं साम न पारुष्यमिति ।

EXERCISE XIII.

I. Dissolve and name the following compounds:—
कम्पितवृक्षः, भूमिवर्धनः, हरितहयः, मज्जातजातः, युधिष्ठिरः, धर्मपरः, and भास्करः

II. Give the meanings of.—सैरंध्री, क्षय (in यमक्षय), पुनरुक्त, चीर and प्रभात.

III. Transform or paraphrase.—
राजबन्धुत्वाज्जातदर्पः। किं कलहेन। भास्करेण रश्मयो विकीर्णाः।

IV. Explain चक्षुर्वै सत्यम्.

V. Derive पान्थ, पारुष्य, रसिक, साहस and बन्धु.

VI. Illustrate the uses of two चs mutually correlative.

LESSON XIV.

मृच्छकटिकस्य संविधानकम्

PART I.

आसीदवन्तिपुर्यां, महाभिजनो गुणसंपन्नः शीलवांश्चारुदत्तो नाम सार्थवाहो द्विजः। स च, अत्युदारैर्दानभोगादिभिः क्षीणविभवश्चारित्र्यावशेषो बभूव । तस्यां नगर्यां, तद्गुणानुरक्ता वसन्तसेना नाम

वेशवनिता न्यवसत् । अस्याश्च पुर्याः, अयथार्थनामा पालकः पालको बभूव । अस्य श्यालः संस्थानको नाम, मूढो नृपप्रसाददुर्ललितः सुभगंमन्यश्चासीत् । असौ वसन्तसेनां चकमे । राज्ञः शासनदोषेण लब्धावसराः प्रजानां क्षेमदर्शिनः केचिच्छूराः नरपतिवधाय गूढप्रबन्धं रचयामासुः । आर्यको नाम तेषामधिष्ठाता, राज्ञा कारागृहे निगडित-स्तस्थौ ॥

कदाचिद्रात्रौ, चारुदत्तं रमयित्वा, गृहं प्रति प्रस्थिता वसन्तसेना तदुपाचिकीर्षया, मार्गे चोरभयं नामोत्प्रेक्ष्य, निजाभरणानि तस्यार्पितवती । अथैकदा शर्वर्यां, शर्विलको नाम श्रोत्रियकुलपुत्रश्चालितवृत्तः गृहभङ्गेन तदाभरणजातमपजहार, तच्च वसन्तसेनाया हस्ते निधाय, स्वहृदयवल्लभां मदनिकां नाम तदीयां दासीं दास्यान्मोचयामास । दृष्टमात्रास्तेऽलंकाराः, वसन्तसेनयाभिज्ञाताः ।

अथ प्रभाते चारुदत्तस्तेषामलंकाराणां निष्क्रयार्थमुदारशीलया कुटुम्बिन्या धूतया समर्पितामनर्घां रत्नावलीं, ससंदेशां, सर्वकालमित्रस्य मैत्रेयस्य हस्ते, वसन्तसेनायाः प्रहितवान् । स च गत्वा, रत्नावलीं च दत्वा, वयस्यवाचिकं कथयामास । यत्त्वदीयानि भूषणानि मया द्यूते हारितानि । अतस्तेषां मूल्यत्वेन, प्रसीदेमां रत्नावलीं स्वीकर्तुमिति । एतेनास्य मानशौण्डीरत्वेन, वसन्तसेनाहृदयं सर्वथा परवशीकृतम् ।

ततः प्रदोषे सा, तानलंकारान्रत्नावलीं चादाय, चारुदत्तमुप-स्थिता । आत्मीयेति कृत्वा मया रत्नावली द्यूते हारिता । अतस्तन्मूल्य-त्वेन गृहाणेमान्याभरणानि, इति वदन्ती सा तानि तस्य हस्ते विततार । तानि प्रेक्ष्याभिज्ञाय च, कथमिदं जातमिति भ्रान्तचित्ताय, चारुदत्ताय, साखिलं वृत्तं वर्णयांचकार । रत्नावलीमपि, आर्याधूतायै विससर्ज । अ-त्रान्तरे, कनकशकटिकां क्रीडार्थं प्रार्थयमानं, निरस्तदास्याहृतमृच्छ-कटिकं, प्ररुदितं चारुदत्तकुमारं रोहसेनं प्रीणयितुकामा सा निजाभर-णानि शरीरादवतार्य सुवर्णशकटिकानिर्माणाय तस्मै दत्तवती ।

EXERCISE XIV.

I. Give the meanings of.—
अभिजन, चारित्र्य, दुर्ललित, निगडित, नाम (in चोरभयं नामोत्प्रेक्ष्य), कुल (in कुलपुत्रः), जात (in आभरणजातम्), निष्क्रय, शौण्डीर (in मानशौण्डीरः), and प्ररुदित.

II. Dissolve and name the following compounds:—
सार्थवाहः, वेशवनिता, यथार्थनामा, सुभगंमन्यः, निष्क्रयार्थम्, अनर्घा, सर्वकालमित्रम्, and परवशीकृतम्.

III. Transform or paraphrase.—

स दासीं मोचयामास ।
आर्यको निगडितस्तस्थौ ।
मया भूषणानि हारितानि ।

IV. Give the derivation of शकटिका.

V. On the analogy of भ्रान्त (from भ्रम्), form past participles from the seven roots.—
दम्–तम्–क्षम्–क्लम्–क्रम्–शम्–श्रम्.

LESSON XV.

मृच्छकटिकस्य संविधानकम्

PART II.

अपरेद्युः, विहारार्थं पुष्पकरण्डकं नामोद्यानं गतश्चारुदत्तः, वसन्तसेनानयनाय प्रवहणं प्रास्थापयत् । तदर्थं द्वारि प्रतीक्षमाणं तत्प्रवहणं, कारागृहात्प्रसभं पलायित आर्यकः, नूपुररवानुकारि मुखरं शृङ्खलाखण्डमुद्वहन्नारुरोह । आरूढे च तस्मिन्, वसन्तसेनामेवागतां मन्यमानो यन्ता चारुदत्तं प्रवहणं नीतवान् । तदा, शरणागत आर्यकः, महात्मना चारुदत्तेन, अभयवचनेनाश्वासितः, क्षेमार्थं च तेनैव प्रवहणेनापवाहितः । अतीतो वसन्तसेनागमनसमयः, इति विचिन्त्य, चारुदत्तो नगरं निवृत्तः ।

तदेवोद्यानं गतं स्वामिनं संस्थानकं पुरं प्रति प्रत्यानेतुं प्रवहणेन प्रस्थितश्चेटः, शकटैः संकटायां रथ्यायामवसरं प्रतीक्षमाणः, क्षणं प्रवहणमस्थापयत् । अनेन समयेन, विरचिताविदग्धनेपथ्या वसन्तसेना द्वारदेशमागत्य, तत्र वर्तमानं तदेव प्रवहणं चारुदत्तप्रेषितमिति कृत्वारुरोह। चेटस्तु, चलत्सु शकटेषु, तामारोहन्तीं न शुश्राव। लब्धेऽवकाशे, पुनः प्रवर्तितेन प्रवहणेन संस्थानकं प्राप ।

अथातर्कितोपनतां वसन्तसेनां वीक्ष्य, संस्थानकः प्रमुदितः । तां पुनः स्वप्रार्थनां प्रत्यादिशन्तीं, भृशमभिचुक्रोध, हन्तुकामश्च गले पाणिभ्यां पीडयामास । तेन विरतचेष्टां तां मृतामाकलय्य, गर्तायां शुष्कपर्णगूढां विधाय, नगरमाजगाम । अथ, तस्या हृदयचौरस्य चारुदत्तस्यापचिकीर्षया, अधिकरणं प्राप्तः कथयामास, यदनेन नष्टविभवेन, अलंकारलोभेन हता वसन्तसेनेति ॥

तदनु, आहूतश्चारुदत्तः, "अहमनागाः, इमं व्यतिकरं लेशतोऽपि न वेद्मि," इत्यवोचत् । अनेन समयेन, कनकशकटिकाविधानाय वसन्तसेनया वितीर्णमाभरणजातं चारुदत्तादेशतस्तस्यै प्रत्यर्पयितुं प्रस्थितो मैत्रेयः, मार्गे मित्रं मिथ्यादोषदूषितमाकर्ण्य, अधिकरणं प्राप्तः। तत्र, संस्थानकं तस्याभियोक्तारं दृष्ट्वा, रोषावेशेन तं ताडयितुं प्रवृत्तः । परस्परं प्रहरतोस्तयोः, मैत्रेयस्य कक्षगतं भूषणभाण्डमधो भ्रष्टम्। तदालोक्य, चारुदत्तस्य निर्दोषत्वमात्मना दृढं श्रद्दधानोऽप्यधिकरणिकः, स्वाधिकारनिर्वहणपरतन्त्रः, नयानिष्ठुरतामाश्रित्य, तं कृतापराधमाख्याय, राज्ञानुमतस्तद्वधमादिदेश । तदनु, स तपस्वी वधस्थानं नीतः ।

अत्रान्तरे, उद्यानादपक्रान्ते संस्थानके, कश्चिद् भिक्षुः, संज्ञामापद्यमानां वसन्तसेनामुपरिगतानां पर्णानां चलनादुपलभ्य, तां च जलसेकादिना प्रकृतिस्थां विधाय, तया सह नगरं प्रस्थितः । मार्गे विलपतः पौरवर्गाच्चारुदत्तं हनिष्यमाणं निशम्य, तावुभौ त्वरया वधस्थानमासेदतुः। तां दृष्ट्वा, कोपकरुणाविस्मयानन्दमध्यवर्तिषु जनेषु, भीत्या नश्यन्, हताशः संस्थानकः, कैश्चिन्निगृह्य, चारुदत्तं नीतः। तेन पुनर्महानुभावेन,

अक्षतशरीर एव प्रतिमुक्तः। तदानीमेव, असामान्यसाहसोत्कर्षेण राजानं हतवानार्यकः, नागरिकै राज्येऽभिषिक्तः। सोऽपि, उपकर्तारं चारुदत्तं, कुशावतराज्यदानेनाभिनन्दयामास।

एवं गुणवान्पुण्यशीलो महात्मा चारुदत्तः, महान्तमभ्युदयमाधिजगाम। दुर्गुणः पापात्मा नीचश्च संस्थानकः दुर्गतिं प्राप। एवत्सर्वमद्भुतं शुभोदर्कं वृत्तं, शूद्रकेण कविना मृच्छकटिके नाम नाटके निपुणमुपनिबद्धं पठतां जनानामनल्पां प्रीतिं जनयति॥

EXERCISE XV.

I. Dissolve and name the following compounds:—
अपरेद्युः, विहारार्थम्, शरणागतः, अतर्कितोपनता, अनागाः, प्रकृतिस्था and शुभोदर्कम्.

II. Derive मुखर.

III. Give the meanings of.—विदग्ध (*adj.* to नेपथ्य), अधिकरण, व्यतिकर, अभियोक्तृ, तपस्विन्, and नश्यत्.

IV. Transform or paraphrase:—
प्रवहणेन प्रस्थितः। चेटस्तामारोहन्तीं न शुश्राव। चारुदत्तं हनिष्यमाणं निशम्य। राज्येऽभिषिक्तः।

V. Illustrate the rule क्रुधद्रुहोरुपसृष्टयोः कर्म.

VI. Describe the form अपचिकीर्षया.

VII. Account for the several feelings of the people involved in कोपकरुणाविस्मयानन्दमध्यवर्तिषु.

VIII On the analogy of क्षत (from क्षण्), derive past participles from तन्, क्षिण्, वन्, मन्, हन्, गम्, नम्, यम् and रम्.

CHAPTER VII.

Lessons for translation into Sanskrit.

LESSON I.

The Sun.

The sun rises in the East and sets in the West. The time of *sunrise* is called the morning. The time of *sunset* is called the evening. You may hear the birds singing in the trees in the morning, for they are glad to see the sun again after the long dark night. At sun-rise and at sun-set, *the colours of the sky* are often very pretty. From the sun we get all our *light and heat*. If there were no sun, there would be no life and no joy *in the world*. Not a tree, not even *a blade of grass*, could grow and man could not live, if the sun did not shine. The sun is so bright that we cannot look in its face. If we were so foolish as as to do it, it would hurt our eyes and perhaps make us blind. Sometimes the sun is so hot, that we cannot go out *in the middle of the day* without a shade or a carriage. The sun is very far away from the earth. If it were nearer, then it would burn up every living thing.The sun seems to be smaller than the earth, but it is not so; it is many hundred times larger. It seems to be smaller, because it is so far away.

LESSON II.

How a King was flattered.

A king, having seen a bird *seated on the branch of a tree*, said to the men who were with him, "I wish to shoot that bird. Give me the bow." So they gave him *the bow and arrow*. He drew the bow and took aim; but his arm shook, and so he did not shoot the bird.

The king was much ashamed that he did not hit the bird, even while it was not flying, but seated *on a branch*; and he was going to try again.

But before he had had time to draw the bow and discharge a second arrow, the bird flew away.

The men then said, "Ah, what a kind and good man this king of ours is ! He was too kind to shoot the poor bird : so he let it fly away and escape."

LESSON III.

Our Food.

For food we have *milk and rice and other* things. Milk is the only food of very young children. It is a large part of the food of people in all lands. We get milk from the cow, and the goat and some other animals. When they get good grass to eat, they give much milk. From milk we can make butter and ghee. Rice is got from paddy. Paddy is a *grass-like* plant. It has a long hollow stalk *called straw*. At the top of each stalk there is an ear, which holds grain. The paddy is then thrashed and the grain is pounded and cleaned. Then we have rice. We boil the rice, add a little salt to it and then eat it *with curry*.

LESSON IV.

Hercules and the Carter.

As a clownish fellow was driving his cart *along a deep miry lane*, the wheels stuck so fast in the clay, that the horses could not draw them out. Upon this, he fell a-bawling and praying to Hercules (the god of strength among the ancient Greeks) to come and help him. Hercules, looking down from a cloud, bid him not lie there, like an idle rascal, but get up, en-courage

his horses, and clap his shoulder to the wheel; adding, that this was the only way for him *to obtain his assistance.*

LESSON V.

The thirsty crow.

A crow was once so thirsty that he thought he would die if he did not soon find water. After some time, he saw *a jug of water*; but, when he flew down to it, he found that the water was too low in the jug for him to be able to reach it. He was about to go away in dispair, when he thought of a plan. Fetching a few pebbles, he dropped them one by one *into the jug*. This made the water rise high enough for him to be able to reach it. Thus he saved his life by his cleverness.

LESSON VI.

The Boy and the Jar.

A boy once found a jar, which had *a long thin neck.* The neck was so thin, that he could scarcely put his hand into it. On looking into the jar, he saw that *six or seven large ripe* plums were lying in a heap at the bottom. So he put his hand down the neck of the jar to take out the plums, and took hold of two plums at once. But he found that he could not now draw his hand out.

A man who was standing by, said to him, "If you cannot take out two plums at once, take out one at a time. Your fist will be smaller *with one plum in it* than with two." The boy did so; and by holding one plum at a time, he got them all out by degrees, one after another.

He how grasps at too much may lose all. Be content with taking a little at a time.

LESSON VII.

The Ape and the Trap.

Apes, like some children, often wish to meddle with things they should not touch. An ape whose name was श्याम once saw a man spreading leaves and dust with great care in *the corner of a field.* The ape wanted to know what the man had been hiding. So, as soon as he went away, श्याम ran to the spot. While श्याम was feeling among the leaves, his paw was caught fast in *the sharp jaws* of *a steel trap*. He cried with pain and tried to pull his paw away, but he could not get off, until the man, taking pity on him, set him free.

LESSON VIII.

Their most valuable property.

A king once besieged a city for a long time, and after a brave defence, the people had to surrender. The king sent a message into the town before his soldiers entered it, saying, "I do not wish to kill the women. They may go away to-morrow in peace, and each may carry away her most valuable piece of property." On the morrow the women marched *out of the city*, and they were seen to be staggering under *heavy loads.* They were carrying away their husbands, for these were their most valuable possessions.

LESSON IX.

The fisherman and the little fish.

A fisherman once caught a small fish, which began to pray for its life. "I am much too tiny to be of any use to you," it said, "why do you not put me back in the water now, and come and catch me again *when I have grown big?*" But the fisherman replied, "Perhaps you might not come back to be

caught, when you have grown big. A little fish is better than no fish at all, so I think I will keep you."

LESSON X.

Story of a parrot.

A poor man had a parrot. The parrot had been taught to say the words, "There is no doubt about it." These words were all it could learn, and it might have been heard all day long either whistling a tune or calling out, "There is no doubt about it!"—"There is no doubt about it!"

To every question, Poll always gave the same reply, "There is no doubt about it."

One day its master went to market to sell it. "Who will buy *my parrot*?" cried he. "Twenty दीनारs for my parrot!"

A man, hearing the high price that was asked, turned to the parrot, and said, "Poll, art thou *worth twenty* दीनारs?"

"There is no doubt about it!" was Poll's reply. The man was so pleased, that he bought the bird, and carried it home.

Sometime after, he was sorry for his bargain. Standing *beside the cage of the parrot,* he said, "What a fool I was to throw so much money away!" "There is no doubt about it!" cried the bird. And this time the parrot was right.

LESSON XI.

Mimic Monkeys.

A sailor once went ashore on the coast of *South America.* He had with him a number of red woollen caps *for sale.* On his way to a town at some distance from the coast, he had to pass through a forest, in which *troops of monkeys* were everywhere seen climbing among the trees.

At noon, as the sun was right over-head, the sailor had to take shelter from its *burning rays.* He lay down to rest under a large tree. Taking one of the caps out of his bundle, he put it *on his head*, and soon fell fast asleep.

When he awoke, he found to his amazement that the caps were all gone! He heard a most unusual chattering among the dense branches above him, and looking up he saw the trees *alive with troops of monkeys.* On the head of each monkey was a red woollen cap! The little mimics had watched his proceedings; and having stolen his caps while he slept, had adorned their black pates with their booty. The monkeys gave no heed to his shouts, but only grinned at his rage. Finding every attempt to get back his caps fruitless, he pulled off the one which he had put on his head, and threw it on the ground, crying out, "Here, you little thieving rogues, if you *will* keep the rest, you may take this one too!" No sooner had he done this, than, to his great surprise, the little animals at once did the same. Each snatched the cap from his head and threw it on the ground! The sailor regained all his caps, and marched off *in triumph.*

LESSON XII.

The Moon.

The moon is a round ball. We cannot tell *its size* by looking at it. Some boys and girls think it as large as the sun, but it is very much smaller. It is not so large as the earth even. If you hold a flower in your hand, it will look as large as a very distant tree; but the tree is really larger *than the flower.* So if the moon seems to be as large as the sun, it is because the sun is so much farther away. The moon does not give us heat like the sun. It gives us only light, and that light is not its own. The moon is a dark body; it borrows all its light from the sun. The light of ths sun *falling on the face of the moon* causes it to shine.

Some boys and girls think that they can see the moon move. Yet they do not see the moon move, but only the clouds. If you look at the moon up through the *branches of a tree*, you will find that it seems to stand quite still and only the clouds beside it move. Yet the moon does move but so slowly that it seems to us to be quite still. It moves round the earth in a month.

LESSON XIII.

Good and bad apples.

One day Robert's father saw him playing with some bad boys. He had observed for some time a change for the worse in his son, and now he knew the cause. He was very sorry, but he said nothing to Robert at the time. In the evening he brought from the garden six beautiful apples, put them *on a plate*, and gave them to Robert, who thanked him. " You may lay them aside for a few days, that they may become mellow, " said the father. Robert cheerfully placed the plate *with the apples* in his mother's *store-room*. Just as he was putting them away, his father laid on the plate a seventh apple, which was quite rotten, and he desired Robert to let it remain there. "Father," said Robert, " the rotten apple will spoil all the others. " " Do you think so ? Why should not the sound apples rather make the bad one sound ? " said his father. With these words he shut *the door of the room*. *Eight days* afterwards he asked his son to open the door and take out the apples. But what a sight was there ! The six apples, which had been so sound and good, spread a bad smell through the room. " O father ! " cried he, " did I not tell you that the rotten apple would spoil the good ones ? " " My boy, " said his father, have I not often told you that *the company of bad children* will make you bad ? Yet you do not listen to me. I want you to learn a lesson from these apples. If you keep company with wicked boys, you will be soon like them. "

Robert did not forget the lesson. When any of his former *play-fellows* asked him to join in their games, he thought of the rotten apples, and refused to play with them.

LESSON XIV.

The Mangoes.

Two little boys राम *and* कृष्ण were one day walking along the road, when they came to a garden *with a wall round it. Inside the garden*, they could see all kinds of fruit trees *with ripe fruit hangiug from them.* The two little boys stopped to look at them. Now they wished they could have some of the fruit they saw. At last राम said, "Let us go over the wall and have some of the mangoes; they will be so *nice and cool* on this hot day." That would be wrong;" said कृष्ण, "for the fruit does not belong to us. It would be stealing to take it." "There is no one near to see us, and if you do not tell, no one can know." "Do you not know that God sees you, and knows all that you do ?" Just then they saw a man leap over the wall a little way off. He went straight to a tree and began to help himself to mangoes. But he had not plucked many, when *the owner of the garden* came upon him. "Why do you come into my garden to steal my fruit?" he asked *in an angry tone,* "I will teach you a lesson, you, *bad man.*" So he called some of his servants and sent him to town to be handed over to the police. राम looked on in silence. He was now glad that he had such a good boy as कृष्ण for his friend. Try to be always with those who lead you in *the right way.*

LESSON XV.

Counsels to Children.

Never tell an *untruth.* When you are relating any thing that you have seen or heard, tell it exactly as it was. Do not

alter or invent any part, to make, as you may think, a prettier story. If you have forgotten any part, say that you have forgotten it. Persons *who love the truth* **never tell a lie even in jest.**

Consider well before you make a promise. If you say you will do a thing, and you do it not, you will tell a lie; and who then will trust or believe you?

When you have done wrong, do not deny it, even if you are afraid that you will be punished for it. If you are sorry for what you have done, and try to do so no more, people will very seldom be angry with you, or punish you. They will love you for speaking the truth; they will think that they may always believe what you say; since they find you will not tell a lie even *to hide a fault,* **and to prevent yourself from being punished.**

When you are asked a question, answer boldly and simply, thinking only of the truth. We cannot trust or like a boy, unless he gives plain answers when questioned.

LESSON XVI.

पाणिनि's Triumph.

Now in course of time, वर्ष got a large *number of pupils,* and among them there was one rather stupid pupil *of the name of* पाणिनि. Being *wearied out with service,* he was sent away by *the preceptor's wife.* Being disgusted at it and *longing for learning,* he went to the Himalayas to perform austerities. There he obtained from the god *who wears the moon as a crest, propitiated by severe austorities, a new grammar, the source of all learning.* Thereupon he came and challenged वररुचि to a disputation; and *seven days* passed away in the course of the disputation. On the eighth day, he had been fairly conquered by वररुचि, but *immediately afterwards,* a terrible *menacing sound* was uttered by शिव *in the firmament.* Owing to that the ऐन्द्र grammar was exploded out of the world and वररुचि *and others, being conquered by* पाणिनि, became accounted fools.

LESSON XVII.

Story of राम.

The god *from whose navel the lotus springs* became fourfold, as the four sons of दशरथ–राम, लक्ष्मण, भरत and शत्रुघ्न *for the protection of the world.* राम, whilst yet a boy, accompanied विश्वामित्र *to protect his sacrifice*, and slew ताडका. He afterwards killed मारीच with resistless shafts; and सुबाहु and others fell by his arrows. He removed the guilt of अहल्या by merely looking upon her. In *the palace of* जनक, he broke *with ease* the mighty bow of महेश्वर, and received, as the prize of his prowess, the hand of सीता, the daughter of the king, *self-born* from the earth. He humbled the pride of परशुराम, who vaunted his triumphs over *the race of* हैहय, and his repeated slaughters of the क्षत्रिय tribes. Obedient to *the commands of his father*, and cherishing no regret for *the loss of sovereignty*, he, accompanied by his brother लक्ष्मण, and his wife सीता, entered the forest where he killed *in conflict* विराध, खर, दूषण, *and other* राक्षस*s*, the *headless* giant कबन्ध and वालिन् (*the monkey-monarch*). Having built a bridge across the ocean and destroyed the whole राक्षस nation, he recovered (his bride) सीता whom their *ten-headed* king रावण had carried off, and returned to अयोध्या with her, after she had been purified by *the fiery ordeal* from the soil *contracted by her captivity* and had been honoured by the assembled gods who bore witness to her virtue. भरत made himself master of *the country of the* गंधर्व*s* after destroying vast numbers of them; and शत्रुघ्न, having killed the राक्षस chief लवण, *the son of* मधु, took possession of *his capital* मथुरा.

Having thus, by their *unequalled valour and might*, rescued the whole world from the dominion of malignant fiends, राम, लक्ष्मण, भरत and शत्रुघ्न reascended to heaven and were followed by those people of कोसल, who were *fervently devoted* to these incarnate portions of the Supreme विष्णु.

LESSON XVIII.

Contentment.

"Give me neither poverty nor riches", this will ever be the prayer of the wise. For wealth is a relative thing; since he that has little and wants less is richer than he that has much but wants more. True contentment depends not upon what we have; a tub was large enough for Diogenes, but a world was too little for Alexander.

LESSON XIX.

The three bride-grooms.

PART I.

In the city of उज्जयिनी, there was a king *named* महाबल, who had a daughter *of incomparable beauty* endowed with all imaginable good qualities, and *who had attained to years of puberty*. In order to match her in alliance with one of royal blood, the king undertook a journey to the South. Arrived at *the court of a king* in that part, he was addressed by an unknown Brahman who demanded of him his daughter in marriage. The king answered that he had resolved to marry her to a person bearing some good quality; when the Brahman exclaimed, "I possess one" "What is that?" asked the king. I have made an artificial chariot *which possesses the virtue of being moved in the air*". "Well then" said the king, "Can you conduct me by it to उज्जयिनी? There you shall be married with my daughter". Presently both sat in the chariot, and in a twinkling they reached उज्जयिनी through the air.

During the king's absence, however, a Brahman *possessed of some art* applied for the princess to her brother. He was acquainted with past, present and future things. There was also *another person* introduced for the same purpose to the queen, *the princess' mother*, without the knowledge of either the king

or the prince. This man was an archer and possessed the power of shooting any animal with no other guide than the beast's sound.

LESSON XX.

The three bridegrooms.

PART II.

Thus, the three assured themselves of obtaining the princess. On hearing this, the king was much *embarassed as to what to do next*. In the meanwhile, the princess was one night ravished by a giant, who seeing her beauty had fallen in love with her. Next morning, the king held a council to determine on the best measures *he could take to discover the princess*; when the Brahman that was acquainted with the past, present and future, said that the princess had been taken by a ravisher to *Mount* विन्ध्य. The archer said I would kill the ravisher and rescue the princess, if I could but reach *the haunt of the giant.*" The third said, "I will repair that want by lending you my chariot. In short, they all mounted the chariot and went through the air to the mountain and having traced out the ravisher, killed him, and returned to the city with the princess. The king was *overjoyed* at the restoration of his daughter. He then gave her in marriage to that Brahman who could tell where she had been, for without this knowledge the efforts of the other two would have been useless.

LESSON XXI.

Origin of the term काकुत्स्थ.

In the त्रेतायुग, a violent war broke out between *gods and demons*, in which the former were vanquished. They consequently had recourse to विष्णु for assistance and propitiated him by their adorations. The Eternal Ruler of the universe, नारायण had compassion upon them and said, "What you desire

is known to me. Hear, how your wishes shall be fulfilled. There is an illustrious prince named पुरंजय, son of *a royal sage*. Into his person, I will infuse a portion of myself, and having descended upon earth, I will in his person subdue all your enemies." Do you therefore endeavour to secure the aid of पुरंजय *for the destruction of your enemies*." Acknowledging, *with reverence, the kindness of the Deity*, the *immortals* quitted his presence and repaired to पुरंजय, whom they thus addressed. "*Most renowned* क्षत्रिय, we have come to thee, to solicit thy alliance against our enemies. It will not become thee to disappoint our hopes." The prince replied, "Let this your इन्द्र, *the monarch of the spheres*, the god *of the hundred sacrifices*, consent to carry me *upon his shoulders*, and I will wage battle with your adversaries, as your ally". The gods and इन्द्र readily answered, "so be it!" and the latter assuming *the shape of a bull*, the prince mounted upon his shoulders. Being thus *filled with delight* and invigorated by the power of the Eternal Ruler of all *movable and immovable* things, he destroyed, in the battle that ensued, all *the enemies of the gods*; and because he annihilated the demon host while seated upon the shoulders (or ककुद् of the bull), he thence obtained the appelation of ककुत्स्थ (seated on the hump); and his descendants are often spoken of as काकुत्स्थ.

CHAPTER VIII.

Select poetic passages for interpretation and recitation.

(१) ईशवन्दनम्

नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशंकरात्मने ॥ १ ॥

यो देवः सवितास्माकं धियो धर्मादिगोचरे ।
प्रेरयेत्तस्य तद्भर्गः सद्वरेण्यमुपास्महे ॥ २ ॥

अभ्रश्यामः शुभ्रयज्ञोपवीती
सत्कौपीनः पीतकृष्णाजिनश्रीः ।
छत्री दण्डी पुण्डरीकायताक्षः
पायाद्देवो वामनो ब्रह्मचारी ॥ ३ ॥

यः पूतनामारणलब्धकीर्तिः काकोदरो येन विनीतदर्पः ।
यशोदयालंकृतमूर्तिरव्यात्पतिर्यदूनामथवा रघूणाम् ॥ ४ ॥

इन्दीवरदलश्यामामिन्दिरानन्दकन्दलम् ।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥ ५ ॥

दामोदर गुणमन्दिर सुन्दरवदनारविन्द गोविन्द ।
भवजलधिमथनमंदर परमं दरमपनय त्वं मे ॥ ६ ॥

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ ७ ॥

पर्वतभेदि पवित्रं जैत्रं नरकस्य बहुमतंगहनम् ।
हरिमिव हरिमिव हरिमिव सुरसरिदम्भः पतन्नमत ॥ ८ ॥

(२) धर्मप्रशंसा

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ॥ ९ ॥

सत्यं ब्रूयात्प्रियं ब्रूयान्नब्रूयात्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥ १० ॥

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ ११ ॥

चत्वारो धनदायादा धर्माग्निनृपतस्कराः ।
तेषां ज्येष्ठावमानेन त्रयः कुप्यन्ति बान्धवाः ॥ १२ ॥

धनानि भूमौ पशवश्च गोष्ठे भार्या गृहद्वारि जनः श्मशाने ।
देहश्चितायां परलोकमार्गे कर्मानुगो गच्छति जीव एकः ॥ १३ ॥

---

(३) विद्यामहत्त्वम्.

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥ १४ ॥

सद्विद्या यदि का चिन्ता वराकोदरपूरणे ।
शुकोऽपि लभते वृत्तिं हरे राम इति ब्रुवन् ॥ १५ ॥

विद्या मित्रं प्रवासे च भार्या मित्रं गृहेषु च ।
व्याधिस्थस्यौषधं मित्रं धर्मो मित्रं मृतस्य च ॥ १६ ॥

सुखार्थी च त्यजेद्विद्यां विद्यार्थी च त्यजेत्सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ॥ १७ ॥

रूपयौवनसंपन्ना विशालकुलसंभवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ १८ ॥

मतिरेव बलाद्गरीयसी तदभावे बलिनोऽपि निर्बलाः ।
इति घोषयतीव डिण्डिमः करिणो हस्तिपकाहतः क्वणन् ॥ १९ ॥

इतरतापशतानि निजेच्छया ।
वितर तानि सहे चतुरानन ॥
अरसिकेषु कवित्वनिवेदनं ।
शिरसि मा लिख मा लिख मा लिख ॥ २० ॥

---

(४) दैवविलसितम्.

निमग्नस्य पयोराशौ पर्वतात्पतितस्य च ।
तक्षकेणापि दष्टस्य आयुर्मर्माणि रक्षति ॥ २१ ॥
वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतसंकटे वा ।
सुप्तं प्रमत्तं विषमास्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥ २२ ॥
न निर्मिता केन न दृष्टपूर्वा न श्रूयते हेममयी कुरङ्गी ।
तथापि तृष्णा रघुनन्दनस्य विनाशकाले विपरीतबुद्धिः ॥ २३ ॥
स्वयं महेशः श्वशुरो नगेशः सखा धनेशस्तनयो गणेशः ।
तथापि भिक्षाटनमेव शंभोर्बलीयसी केवलमीश्वरेच्छा ॥ २४ ॥

---

(५) उद्यमोत्कर्षः

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ २५ ॥
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्-
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ २६ ॥

नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिः ।
आ मृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् ॥ २७ ॥

उत्साहसंपन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः॥२८॥

निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः ।
सोद्योगं नरमायान्ति विवशाः सर्वसंपदः ॥ २९ ॥

विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ॥ ३० ॥

सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम् ।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् ॥ ३१ ॥

रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः ॥३२॥

---

(६) वित्तवर्णनम्

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः सः श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः कांचनमाश्रयन्ते ॥ ३३ ॥

वयोवृद्धास्तपोवृद्धा ज्ञानवृद्धास्तथापरे ।
ते सर्वे धनवृद्धस्य द्वारि तिष्ठंति किंकराः ॥ ३४ ॥

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥ ३५ ॥

सुखं हि दुःखान्यनुभूय शोभते घनांधकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति ॥ ३६ ॥

प्रायेण धनिनामेव धनलोभो निरन्तरम् ।
पश्य कोटिद्वयोपेतं लक्षाय प्रणतं धनुः ॥ ३७ ॥

अन्यायोपार्जितं द्रव्यं दश वर्षाणि तिष्ठति ।
प्राप्ते त्वेकादशे वर्षे समूलं च विनश्यति ॥ ३८ ॥

---

(७) वैभवम्

अलमेष विलोकितः प्रजानां सहसा संहतिमंहसां विहन्तुम् ।
घनवर्त्म सहस्रधेव कुर्वन् हिमगौरैरचलाधिपः शिरोभिः ॥ ३९ ॥

संवाद्भिः सकुसुमरेणुभिः समीरैरानम्रैर्बहुफलधारिभिर्वनान्तैः ।
श्च्योतद्भिर्मधुपटलैश्च वानराणामाप्यानो रिपुवधसंभवः प्रमोदः ॥४०॥

इतः स्वपिति केशवः कुलमितस्तदीयद्विषा—
मितश्च शरणार्थिनः शिखरिणां गणाः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्तकै—
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ ४१ ॥

स स्वहस्तकृतचिह्नशासनः
पाकशासनसमानशासनः ॥
आ शशाङ्कतपनार्णवस्थिते—
र्विप्रसादकृतभूयसीर्भुवः ॥ ४२ ॥

---

(८) तेजस्विता.

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ॥ ४३ ॥

कष्टं च खलु मूर्खत्वं कष्टं च खलु यौवनम्।
कष्टात्कष्टतरं चैव परगेहनिवासनम् ॥ ४४ ॥

स पुमानर्थवज्जन्मा यस्य नाम्नि पुरः स्थिते।
नान्यामङ्गुलिमभ्येति संख्यायामुद्यताङ्गुलिः ॥ ४५ ॥

परिवर्तिनि संसारे मृतः को वा न जायते।
स जातो येन जातेन याति वंशः समुन्नतिम् ॥ ४६ ॥

वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम्।
निर्वाणमपि मन्येऽहमन्तरायं जयश्रियः ॥ ४७ ॥

यज्जीव्यते क्षणमपि प्रथितं मनुष्यै-
र्विज्ञानविक्रमयशोभिरहीयमानम् ।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः
काकोऽपि जीवति चिरं च बलिं च भुङ्क्ते ॥ ४८ ॥

यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥ ४९ ॥

किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ ५० ॥

---

(९) सज्जनप्रशंसा

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।
साधवो न हि सर्वत्र चन्दनं न वने वने ॥ ५१ ॥

नागुणी गुणिनं वेत्ति गुणी गुणिषु मत्सरी।
गुणी च गुणरागी च विरलः सरलो जनः ॥ ५२ ॥

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखी।
क्षान्तिः पत्नी शमः पुत्रः षडेते मम बांधवाः ॥ ५३ ॥

परैः प्रोक्ता गुणा यस्य निर्गुणोऽपि गुणी भवेत् ।
इन्द्रोऽपि लघुतां यायात्स्वयंप्रख्यापितैर्गुणैः ॥ ५४ ॥

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ५५ ॥

---

(१०) खलगर्हणम्.

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुंभं पयोमुखम् ॥ ५६ ॥

दुश्चरितैरेव निजैर्भवति दुरात्मा विशङ्कितो लोके ।
दर्शनपथमापन्नं पन्नगकुलमाकुलीभवति ॥ ५७ ॥

मूर्खा यत्र न पूज्यन्ते धान्यं यत्र सुसंचितम् ।
दंपत्योः कलहो नास्ति तत्र श्रीः स्वयमागता ॥ ५८ ॥

दह्यमानाः सुतीव्रेण नीचाः परयशोऽग्निना ।
अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते ॥ ५९ ॥

सीदन्ति सन्तो विलसन्त्यसन्तः पुत्रा म्रियन्ते जनकश्चिरायुः ।
परेषु मैत्री स्वजनेषु वैरं पश्यन्तु लोकाः कलिकौतुकानि ॥ ६० ॥

---

(११) उदारचरितम्

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥ ६१ ॥

पातितोपि कराघातैरुत्पतत्येव कन्दुकः ।
प्रायशस्तु सुवृत्तानामस्थायिन्यो विपत्तयः ॥ ६२ ॥
उदारस्य तृणं वित्तं तृणं शूरस्य जीवितम् ।
विरक्तस्य तृणं भार्या निःस्पृहस्य तृणं जगत् ॥ ६३ ॥
अधमा धनमिच्छन्ति धनमानौ च मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥ ६४ ॥
अखिलेषु विहंगेषु हन्त स्वच्छन्दचारिषु ।
शुक पञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥ ६५ ॥
कान्ताकटाक्षविशिखा न दहन्ति यस्य
चेतो न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरि विषयाश्च न लोभपाशै—
र्लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥ ६६ ॥
उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति विपरीतं भाषितं सज्जनानाम् ॥ ६७ ॥
निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥६८ ॥

---

(१२) सतीचरितम्

पतिं या नाभिचरति मनोवाग्देहसंयता ।
सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते ॥ ६९ ॥

सदा प्रहृष्टया भाव्यं गृहकार्येषु दक्षया ।
सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ॥ ७० ॥

पदन्यासो गेहाद्बहिरहिफणारोपणसमो
निजावासादन्यद्भवनमपरद्वीपतुलितम् ।
वचो लोकालभ्यं कृपणधनतुल्यं मृगदृशः
पुमानन्यः कान्ताद्विधुरिव चतुर्थीसमुदितः ॥ ७१ ॥

---

(१३) अनुशासनम्

यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः ।
तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः ॥ ७२ ॥

उत्पन्नपश्चात्तापस्य बुद्धिर्भवति यादृशी ।
तादृशी यदि पूर्वं स्यात्कस्य न स्यान्महोदयः ॥ ७३ ॥

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥ ७४ ॥

हरिं हरीतकीं राजन् गायत्रीं च दिने दिने ।
मोक्षारोग्यतपःकामश्चिन्तयेद्भक्षयेज्जपेत् ॥ ७५ ॥

किं खलु पथ्यं धर्मः कः शुचिरिह यस्य मानसं शुद्धम् ।
कः पण्डितो विवेकी किं विषमवधरिणा गुरुषु ॥ ७६ ॥

जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः ।
जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥ ७७ ॥

मातृवत्परदारांश्च परद्रव्याणि लोष्टवत् ।
आत्मवत्सर्वभूतानि यः पश्यति स पश्यति ॥ ७८ ॥

यावत्स्वस्थो ह्ययं देहो यावन्मृत्युश्च दूरतः ।
तावदात्महितं कुर्याः प्राणान्ते किं करिष्यसि ॥ ७९ ॥

नान्नोदकसमं दानं न तिथिर्द्वादशीसमा ।
न गायत्र्याः परो मंत्रो न मातुर्दैवतं परम् ॥ ८० ॥

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ॥ ८१ ॥

लालनाद्बहवो दोषास्ताडनाद्बहवो गुणाः ।
तस्मात्पुत्रं च शिष्यं च ताडयेन्न तु लालयेत् ॥ ८२ ॥

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम् ।
शास्त्रपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥ ८३ ॥

त्यजेद्धर्मं दयाहीनं विद्याहीनं गुरुं त्यजेत् ।
त्यजेत्क्रोधमुखीं भार्यां निःस्नेहान्बान्धवांस्त्यजेत् ॥ ८४ ॥

सत्कुले योजयेत्कन्यां पुत्रं विद्यासु योजयेत् ।
व्यसने योजयेच्छत्रुमिष्टं धर्मेण योजयेत् ॥ ८५ ॥

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदार्थे च धरामात्मार्थमुत्सृजेत् ॥ ८६ ॥

प्राप्य चलानधिकाराञ्शत्रुषु मित्रेषु बन्धुवर्गेषु ।
नापकृतं नोपकृतं न सत्कृतं किं कृतं तेन ॥ ८७ ॥

धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते न तत्र दिवसं वसेत् ॥ ८८ ॥

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत् ॥ ८९ ॥

ते शतं हि वयं पंच स्वकीये कलहे सति ।
अन्यैस्तु कलहे प्राप्ते वयं पंचोत्तरं शतम् ॥ ९० ॥

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥ ९१ ॥

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥ ९२ ॥

अनागतविधातारमप्रमत्तमकोपनम्।
स्थिरारम्भमदीनं च नरं श्रीरुपतिष्ठते ॥ ९३ ॥

नात्यन्तं सरलैर्भाव्यं गत्वा पश्य वनस्थलीम्।
छिद्यन्ते सरलास्तत्र कुब्जास्तिष्ठन्ति पादपाः ॥ ९४ ॥

राजन्दुधुक्षसि यदि क्षितिधेनुमेतां
तेनाद्य वत्समिव लोकममुं पुषाण।
तस्मिन्हि सम्यगनिशं परिपोष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ॥ ९५ ॥

---

(१४) सत्यकथनम्.

जनिता चोपनेताच यस्तु विद्यां प्रयच्छति।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥ ९६ ॥

राजपत्नी गुरोः पत्नी मित्रपत्नी तथैव च।
पत्नीमाता स्वमाताच पञ्चैता मातरः स्मृताः ॥ ९७ ॥

हर्षस्थानसहस्राणि भयस्थानशतानि च।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ ९८ ॥

मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरंगैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यम् ॥ ९९ ॥

सुखस्य दुःखस्य न कोऽपि दाता
परो ददातीति कुबुद्धिरेषा।
अहं करोमीति वृथाभिमानः
स्वकर्मसूत्रग्रथितो हि लोकः ॥ १०० ॥

हितैषिणः सन्ति न ते मनीषिणो
मनीषिणः सन्ति न ते हितैषिणः ।
हितश्च विद्वांश्च सुदुर्लभो जनो
यथौषधं स्वादु च रोगहारि च ॥ १०१ ॥

राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।
राजानमनुवर्तन्ते यथा राजा तथा प्रजा ॥ १०२ ॥

एकाकिना तपो द्वाभ्यां पठनं गायनं त्रिभिः ।
चतुर्भिर्गमनं क्षेत्रं पञ्चभिर्बहुभी रणः ॥ १०३ ॥

वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।
एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि च ॥ १०४ ॥

ते पुत्रा ये पितुर्भक्ताः स पिता यस्तु पोषकः ।
तन्मित्रं यत्र विश्वासः सा भार्या यत्र निर्वृतिः ॥ १०५ ॥

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥ १०६ ॥

---

(१५) सुभाषितम्.

दीपो भक्षयते ध्वान्तं कज्जलं च प्रसूयते ।
यादृगन्नं भक्षयते तादृशी जायते प्रजा ॥ १०७ ॥

पथ्येऽसति गदार्तस्य किमौषधनिषेवणम् ।
पथ्ये सति गदार्तस्य किमौषधनिषेवणम् ॥ १०८ ॥

अयुक्तं स्वामिनो युक्तं युक्तं नीचस्य दूषणम् ।
अमृतं मृत्यवे राहोर्भूषायै शूलिनो विषम् ॥ १०९ ॥

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥ ११० ॥

अनन्तपारं किल शास्त्रजातं स्वल्पं तथायुर्बहवश्च रोगाः ।
यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिहाम्बुमध्यात् ॥ १११ ॥

मय्येव जीर्णतां यातु यत्त्वयोपकृतं हरे ।
नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति ॥ ११२ ॥

अहो धनिकता लोके निर्धनस्यापि मारुतेः ।
धनेशार्चितपादोऽपि येन राम ऋणीकृतः ॥ ११३ ॥

अमन्थि मुरवैरिणा पुनरमायि मर्यादया
अहावि मुनिना मुखे वशमनायि लङ्कारिणा ।
अलङ्घि कपिनाप्यसौ सुखमतारि शाखामृगैः
क्व नाम वसुधापतेस्तव यशोनिधिः क्वाम्बुधिः ॥११४ ॥

कस्य मरौ दुराधिगमः कः कमले कथय विरचितावासः ।
कैस्तुष्यति चामुण्डा वद रिपवस्ते कुतो नष्टाः ॥ ११५ ॥

पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासा ।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ॥ ११६ ॥

रवेः कवेः किं समरस्य सारं कृषेर्भयं किं किमुशन्ति भृङ्गाः ।
खलाद्भयं विष्णुपदं च केषां भागीथीतीरसमाश्रितानाम् ॥ ११७ ॥

अहं च त्वं च राजेन्द्र लोकनाथावुभावपि ।
बहुव्रीहिरहं राजन् षष्ठीतत्पुरुषो भवान् ॥ ११८ ॥

अङ्गं गलितं पलितं मुण्डं दशनाविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशा पिण्डम् ॥११९॥

यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ १२० ॥

कुमुदवनमपश्रि श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।

उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिलसितानां ही विचित्रो विपाकः ॥ १२१ ॥

विधुकरपरिरम्भादात्तनिष्यन्दपूर्णैः
शशिदृषदुपक्लृप्तैरालवालैस्तरूणाम् ।
विफलितजलसेकप्रक्रियागौरवेण
व्यरचि स हृतचित्तस्तत्र भैमीवनेन ॥ १२२ ॥

मुञ्चति मुञ्चति कोशं भजति च भजति प्रकम्पमरिवर्गः ।
हम्मीरवीरखड्गे त्यजति त्यजति क्षमामाशु ॥ १२३ ॥

अङ्गेषु मुख्या द्विजमध्यसंस्था बाणानुसंधानपरासि नित्यम् ।
अन्धास्थिरप्रेमरसा रसज्ञे नरस्तुतिं तत्त्यज कर्णवत्त्वम् ॥ १२४ ॥

अधिगतमहिमा मनुष्यलोके बत सुतरामवसीदति प्रमादी ।
गजपतिरुरुशैलशृङ्गवर्ष्मा गुरुरवमज्जति पङ्कभाङ्न दारु ॥ १२५ ॥

बन्धनानि किल सन्ति बहूनि
प्रेमरज्जुकृतबन्धनमन्यत् ॥
दारुभेदनिपुणोऽपि षडङ्घ्रिः
पङ्कजे भवति निष्क्रिय एव ॥ १२६ ॥

कमठपृष्ठकठोरमिदं धनुर्मदनमूर्तिरसौ रघुनन्दनः ।
कथमधिज्यमनेन विधीयतामहह तात पणस्तव दारुणः ॥ १२७ ॥

श्रुत्वा सागरबन्धनं दशशिराः सर्वैर्मुखैरेकदा
तूर्णं पृच्छति वार्तिकान्सचकितो भीत्या श्वसन्संभ्रमात् ।
बद्धः सत्यमपांपतिर्जलनिधिः कीलालधिस्तोयधि-
र्वार्धिः पुष्करधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ॥ १२८ ॥

कस्त्वं शूली मृगय भिषजं नीलकण्ठः प्रियेऽहम्
केकामेकां कुरु पशुपतिर्नैव दृश्ये विषाणे ।

स्थाणुर्मुग्धे न वदति तरुर्जीवितेशः शिवाया
गच्छाटव्यामिति हृतवचाः पातु वश्चन्द्रचूडः ॥ १२९ ॥

भो राजन्यकुलाधमात्रभवतो ब्राह्मण्यमत्रोदितम्
एकामेव निशाचरीं त्वमवधीर्माता न मे ताटका ।
निःक्षत्रा रचिता मया वसुमती कोऽहं भवान् सत्यवाग्
इत्थं भार्गवरोषपोषकरणी वागस्तु नः श्रेयसे ॥ १३० ॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥ १३१ ॥

(१६) ईशप्रार्थनम्

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते
धुर्यां लक्ष्मीमिह मयि भृशं धेहि देव प्रसीद ।
यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन्भूयसे मङ्गलाय ॥ १३२ ॥

APPENDIX.

Difficult words and notes.

✕✕ *The figure on the left in each column refers to the page of the text.*

1 लज्जावती, bashful.
पेशल, sharp, subtle.
विपुल, big, vast.
स्रवन्ती, a river.
सोपानवत्, possessed of a flight of steps.
मैत्रावरुणि, an offspring of मित्र and वरुण.

2 भैमी, daughter of King भीम.
गाधेय, son of King गाधि.
देवव्रत, name of the hero better known as भीष्म.
सौम्य, son of सोम or the moon.
आञ्जनेय, son of अञ्जना.
Fair, निर्मल, प्रसन्न.
Proud, दृप्त, उद्धत.
Domestic, ग्राम्य.
Home-made, गृहनिर्मित.
Plump, मांसल, पुष्ट, विपुल.
Sore, सरुज, गदार्त.
Smooth, सम.
Surface, तलम्.
वेलामतीतः, that has crossed the boundary.
Note—Here a participle ending in त governs an object.

3 आ-दृ, 4*A.* to respect.
अप-ईक्ष्, 1*A.* to await.
निर्मिमाण, from निर् + मा 3*A.* to construct.
सूत्रधारः, a carpenter, who uses a thread for measuring.
To drive, प्र + ईर् *cau*, प्र-वृत् *cau.*, चुद् 10 *u.*
To offer a sacrifice, यज्ञं तन् 5 *u.* आ-हृ 1 *u.*
To occupy, वि–आप् 5 *P.*
To wait upon सेव् 1 *A,* उप–चर् 1 *p.*
Loving the king's daughter राजपुत्रीं कामयमानः or अनुरक्तः.

4 अध्युषित, pp. from अधि-वस् 1 *p,* to inhabit.
गृहीत pp. from ग्रह् 9 *u.* to conquer, or subjugate.
सनाथ, full of, inhabited by.
शाद्वलम्, a meadow covered with grass.
भय-आतुर afflicted with fear.
कपिशा, the proper name of a river.

ईशस्य ज्ञातम्, known to the Lord.

सदागतिः, ever in motion, the wind.

पंचत्वम्, the state of being five, resolution of the body into the five elements after death.

नि-बृह्, *cau.* to kill.

पा, 1 *P.* to drink, 2 *P.* to protect.

Tasted, आस्वादित.

Raised, उद्धृत.

Surrounded, परिक्षिप्त, परिवृत.

Watered by rivers, सरित्सिक्त, नदीप्लावित, नदीमातृक.

Seen by the eyes, लोचनाभ्यां लोचनैः वा दृष्टः.

Note—In speaking of a number of individuals, the names of limbs of the body, existing in pairs, should be used in the dual or plural, according as we look upon the individuals separately or conjointly.

Beaten, आहत.

Dried, शोषित.

5 उत्कर्षः, success or glory.

कर्कंधू, *f.* a tree of बदर, बोर.

वीतिः, a horse.

केसरः, a hair of the mane.

भोक्तृ, a man at his meal.

कात्यायनी, an epithet of Goddess दुर्गा.

दयिता, a wife, (who is protected by the husband).

दार, a wife.

Note—This word is masculine, and always stands in the plural, from the sense of great fear (mixed with hatred) in which the wife of a man was supposed to be held by other females in the house on account of her causing separation between her husband and his brothers. दारयन्ति भ्रातॄन् भर्तुः सकाशात्-ते दाराः.

परिग्रहः, a possession, wife.

प्रसू, *f.* a mother.

6 अवन्ति, *m.* name of a province.

Peace, उपशमः, शान्ति, *f.*

A villager, ग्रामीणः.

A report, शब्दः, निनादः,

A gun, अग्नियंत्रनाडी.

Reach, गोचरः, विषयः.

A cub, पोतः, शिशुः,

A fang, दंष्ट्रा.

निरत, absorbed.

विचक्षण, skilful, clever.

उपलब्ध, found.

अनुमंतृ, one who gives consent or approves.

लंघनम्, leaping, jumping.

7 In the hand, हस्तगत.
A church, प्रार्थनामंदिरम्.
A box, मंजूषा, करंडः.
A bottle, कूपी (diminutive of कूप).
A shell, शुक्ति*f*.
A meadow, क्षेत्रम्.
A basket, वंशपात्रं, कठिनम्.
A store, कोषः.
Lost, नष्ट, नष्टमार्ग.
Bred, संवर्धित, पोषित,
Foreigner, वैदेशिकः.
विसृष्ट, sent.
पूर्णाशः, satisfied.
वचा, वेखंड (मराठी) .
भुक्ति, *f.* worldly enjoyment.
मुक्ति, *f.* absolution.

8 वि–जृम्भ् 1 *A*, to pervade.
निस्–पद् 4 *A*, to result, emanate.
प्रवृत् 1 *A*, to come into existence.
विपरीत (p. p. of वि–परि+इ) contrary.
As making a *general reference* to the three things enumerated in the first half of the stanza, the pronoun एतत् stands in the neuter, singular.
Offered, प्रसारित.
Let loose, मुक्त.
A kennel, श्वालयः.
Set, नियुक्त.
To sit in, उपवेशनार्थ.
A sofa, पर्यंकः, मंचकः.

9 विषाणम्, a horn.
संविभागः, a share.
प्रति+ईक्ष् 1 *A.* to expect.
सारमेयः, progeny of सरमा, a dog in general, the canine species being supposed to have sprung from सरमा, the primeval bitch.
दय् 1 *A.* to take pity on. This root and others of a similar import govern the dative of the object of compassion.
स्फुट्, 6 *P.* to open.

10 प्रति-नंद् 1 *P.* to accept, welcome.
वर्षम्, a shower of rain.
निग्रह्, to withhold.
उपपद्, to be likely or possible.
प्रपद्, to resort to.
तॄ 1 *P.* to surpass, surmount.
अभ्युत्थानम्, rise.
स्तबकः, a bunch, cluster.
जॄ 9 *P.* (जृणाति), to decay.
How bright it is ! अहो निर्मलमाकाशम्.
To be at rest, विश्रम् 4 *P.*
To stay, वस् 1 *P.*
Grandmother, मातामही, पितामही.

All day long, अखिलं दिनं यावत्. where यावत् governs the accusative दिनम्.

Out of sight, चक्षुरविषये, निभृतम्.

In search of, अन्विष्यन् (Part), मार्गणायोद्युक्तः.

Do not hear him till he is quite near यावत्स प्रत्यासन्नो भवति तावत् उपसर्पंतं तं न श्रृण्वंति, ते तं समुपस्थितमेव पश्यंति न पुनरुपसर्पंतं शृण्वंति.

Well, सम्यक्.

Are in great fear of him, तस्माद् भृशमुद्विजन्ते.

Find him out, उपलभन्ते, अन्विष्यासादयन्ति.

Peck at him, तस्मिन् चंचुभिः प्रहरंति.

Do not know how to fight with them, तैः सह कथं योद्धव्यम् तत्, तैः सह योद्धुं, न जानंति.

11 Seems to sink मज्जतीवाभाति, आसन्नमज्जनेव दृश्यते

Wreck, भग्ननौः.

12 विहारः, a ramble.

भूयः, often.

प्रीति, *f.* joy or delight.

क्रीडनकम्, a toy.

वराक, poor, pitiable.

अखिलम् अहः (acc. singular), the whole day.

क्रीडर्नायेषु तस्यादरः शिथिलोऽभवत्, he grew careless of the toys.

निरमीयत third person, singular Imperfect, of निर्-मा 4 *A*, to compose.

सूरिः, a learned person.

13 Some, किंचित्, अल्प, स्तोक.

Once, पुरा, एकदा, पूर्वम्.

Grass-park, शाड्वलम्.

Snow-white, हिमगौर, तुषारधवल.

It was a fine sight for her, तद्दर्शनं तां भृशं रमयाति स्म.

He meant to throw the stone at the poor lark, वराकं भारद्वाजमुपललक्ष्यं कर्तुमैहत, वराके भारद्वाजे उपलं क्षेप्तुमवांछत्.

Small, लघु, तनु,

A spade, खनित्रम्.

As soon as he got it, he went to dig with it, प्राप्तमात्रेण तेन खनितुं स निष्क्रान्तः.

A bit of ground, क्षेत्रैकदेशः.

Held, धारयातिस्म, अबिभर्.

He did his work with a will and did it well, स निश्चयेन कार्ये व्यापृतः तच्च सम्यक् समपादयत्.

He let the box fall down on the ground, तस्य हस्तात स करंडको भूमौ पतितः.

Vexed खिन्न, उद्विग्न, विमनस्.

14 माम् अधीष्व, tach me.

Note here the causal sense possessed by the primitive root अभि–इ.

अतिमात्र, too much.

क्रीडाशुकः, a toy-parrot.

दुःखोदर्क, tragic, ending in sorrow.

कुलायः–म्, a nest.

15 प्रतिपद्, to accept.

मा व्यथिष्ठाः = मा व्यथस्व. Here मा is followed by अव्यथिष्ठाः (aorist), which like a form of the imperfect dispenses with the augment अ, after मा the prohibitive particle.

सपत्नः, enemy, rival.

This word is a rare instance of a masculine derived from the corresponding feminine, as 'widower' from widow in English.

प्रतिमुच्, To put on.

मातृदेवो भव, Deify your mother, look upon your mother as a deity.

To open, उद्घट् *cau*. विस्तृ *cau*.

To cast shadow, छायां कृ or तन्.

A fruiterer, फलविक्रयिन् *m*.

Raw, आम, अपक्व.

Like children, अपत्यनिर्विशेषम्.

To white-wash, सुधया लिप् or धवलय्.

16 To stand, स्था.

To yield to, वशं गम्.

It is not expected from you, नैतत् त्वयि उपपद्यते.

To put to the sword कृपाणधारापथं प्राप् *caus*.

Doomed to death, निश्चितनिधन.

Triumph over, विजयस्व.

17 कवलः-म्, a mouthful.

स्वैरविहारिन्, –wandering at will.

प्रसभम्, forcibly.

विपर्यस्त (p. p. of वि-परि-अस्). turned upside down, over-thrown.

वागुरा, a snare, a net for catching game.

भवनदी, the river-like (continuous) course of the worldly existence.

भद्रशतानि, hundreds of blessings.

अनागस् (अन् + आगस् a fault) Innocent.

विजनम्, wilderness.

पुण्यश्लोक, one whose praise is auspicious.

पाञ्चालिका, a doll or puppet.

उद्विजेत्, absolute form for उद्विजेत from उद् + विज्

6 *A.* to be disgusted.

परवश, dependent on others. वशोऽस्यास्तीति–वशम्, परस्य वशम्–परवशम् where वशः means control or disposal.

पाणिग्राहः, the husband, पाणिं गृह्णाति सः.

18 to turn away निवृत् *cau.*

To inspire with fear, चेतसि भीतिं जन् *caus.*, भी *caus.* त्रस् *caus.*

Carefully, अवहितम्, अप्रमादेन.

To tread upon, पादाभ्यां आ-क्रम्, उपरि पदं नि–अस्.

To think of, मनसि कृ, चिंत्.

To with-stand, सह् 1 *A.* प्रति-कृ.

An attack, आक्रमः, अवस्कंदः.

A volley of arrows, इषुसंहति *f.* शरपरंपरा *f.* बाणावलि *f.*

He makes them give up their courage, तान् धैर्यं त्याजयति, निरस्तधैर्यान्करोति

One should avail one's self of every moment to acquire learning, क्षणशः विद्यां साधयेत्.

38 प्र–नुद् 6*u.*, to dispel, to drive.

उदतिष्ठत, wrongly used for उदतिष्ठत्.

Note–उत्–स्था is Atm., only when it means 'to strive'.

उपचिकीर्षा, desire to oblige.

द्विजः a bird, which has two births, as it were, firstly from the mother bird, and secondly from the egg.

वित्रस् *caus.* to frighten or scare away (and not to torment, which it means in मराठी).

मृगः (मृग्यते सः what is sought after) a beast of game, a wild beast.

सुखम् easily, it is the nom. sing. neuter of सुख, an adjective.

Note—Being used in the Nom. Sing. Neuter, an adjective comes to serve as an adverb.

छल् 10 *u.* to deceive (and not 'to harass' which is the sense in मराठी).

मूर्च्छ् *caus.*, to make one faint, confound.

वि-अनु-नद् *caus.* to resound.

39 एनम् refers to मारुति.

दाक्षिणापथः, The Deccan.

He never stopped crying, रोदनान्नैव विरराम, रुदन् एव अतिष्ठत्.

Noble-man, अधिपः.

To take a walk, वि-हृ 1*u.*

He walked slowly on स तथैव मन्दं चचार.

Not seeming to notice the boy, तद्वचसोऽश्रवणमभिनीय-अपदिश्य, तं कुमारं अपश्यन्त-मिवात्मानं संदर्श्य.
Falling on his knees, जानुभ्यां अवनिं गत्वा.
A butler, सूदः.
To confess, अभि-उप-इ 2 P, –गम् 1 P.
You have lost, त्वया हारितम्.
Dishonestly, छद्मना, अनार्जवेन.
To turn about, परि-वृत् *caus.*
Lead him towards the hermitage, तस्य आश्रमपथमुपदिशन्ति, तं आश्रमं माप-यन्ति.
On each hand, प्रतिहस्तं.
The thumb, अंगुष्ठः.
A toe, पदशाखा.
The back, पृष्ठम्.
The palm, तलम्.
Bad boys, दुर्वृत्ताः कुमाराः.
It pleads for him, तत्पक्षं समर्थयति-मंडयति-परिष्करोति.
To taste, आस्वाद् *10*.
To feel, स्पृश् 6 *P*, स्पर्शेन ज्ञा 9 *u*.
Pale, पांडु, पांडुर.
40 Singing, गानं, कूजितम्.
Music, गीतम्.
Roar, गर्जना, ध्वानः.
Mighty, विशाल, गभीर, प्रचण्ड.
The face they love, प्रेयसो जनस्य मुखम्, अभिमतजनस्य वदनम्.
Fears or joys, भयानंदाः.
Turn your face, आननं परिवर्तय.
To strech out, प्रसृ *caus.*
A map, भूचित्रपटः.
The bottom, तलम्, अधोभागः.
A dark night, तमस्विनी, तमिस्रा.
To run against, लंघ् 10.
A trap, कूटयंत्रम्.
A bell, घंटिका, किंकिणी.
He let it go, स तं मुमोच.
He was glad to get off, मुक्त्यानंदत्,–अहृष्यत्.
Left alone, एक एवावशिष्टः.
He soon felt lonely, अचिरेण आत्मन एकाकित्वात् व्यषीदत्; असहायोऽस्मीति दुःखितः.
He had no rat to vex him तस्य पीडाकरो मूषको नावशिष्टः.
41 A shower of rain, पर्जन्यवृष्टि *f.*
How fast they move along! कथं शीघ्रं एते संसर्पन्ति.
Left, अनाच्छन्न, अनावृत.
There is very little light, लुप्तप्रायः प्रकाशः.
It will soon rain, देवोऽचिरेण वर्षिष्यति
What large drops! अहो स्थूला बिंदवः.
Shelter themselves under the tree, आश्रयार्थिनो वृक्षाणामधस्तिष्ठन्ति–वृक्षतलानि भजन्ते.

The rain is over, विरता वृष्टिः, समाप्तं जलवर्षम्.
Flowers smell sweet, पुष्पाणि सुरभितराणि जायन्ते, मधुरतरामोदं आवहन्ति.
Some salt comes from the sea, कियल्लवणं सागराल्लभ्यते.
To make it run, स्यन्द्, स्रु or वह् *caus*.
A salt-pan, लवणस्थाली.
Is dug out of the earth, वसुधाया उत्खन्यते, उत्खननेनाधिगम्यते.
A pit or mine आकरः, खनि *f.*
Bring up salt from the rocky beds, प्रस्तरनिलीनं लवणमधिगच्छन्ति.
Makes our food taste well अन्नं साधीयसा स्वादेन योजयति, आहारं संपन्नस्वादं करोति.
It turns into blood. रुधिरभावेन परिणमयति, शोणिततां प्रापयति.
An animal, स्वत्त्वः-म्, प्राणिन् *m.*
For the first place अग्रस्थानस्य हेतोः, अग्रस्थानलाभाय.
In shame, लज्जया, सव्रीडम्.
With pride, सदर्पम्, साटोपम्.
To dart down, वेगेन निपत् 1 *p.*
Be not too proud, अतिमात्रं गर्वं मा वह.
42 Seized, गृहीत.
A vine; द्राक्षा,—लता.
At them, तानि उद्दिश्य,—प्राप्तुम्.
Failed to seize them, तानि आसादयितुं नाशकत्, तेषां प्राप्तौ वन्ध्यश्रमोऽभवत्
Time after time, वारंवारम्, भूयोभूयः
Out of reach, अगोचरे, अविषये.
Gave up the attempt, प्रयत्नमजहात्, प्रयत्नाद्व्यरमत्.
Quite sour केवलमम्लानि, अम्लैकरसानि.
They would have made me very ill, if I had been so foolish as to eat them. यदि जडधिया मया तान्यास्वादयिष्यन्त ततस्तानि मां बलवदस्वस्थमकरिष्यन्.
A clever dog, चतुरसारमेयः.
To keep, पाल् 10, पुष् 9 *P.*
To watch, नि-रूप् 10.
The spoil, लोप्त्रम्.
To scartch, उत्-लिख् 6 *P.*
To show where to dig, कुत्र खनितव्यं तत् दर्शयितुम्.
Dangerous भीषण, व्यसनबहुल.
A sailor, नाविकः.
He remarked, साकूतं प्रत्यवदत्.
Then, if I were you, I should never go to see myself, एवं सति त्वदवस्थश्चेत् नाहमात्मना कदापि जलधिं व्रजेयम्.
Most, भूयांसः
To strongly advise सनिर्बन्धं अनुशास् 2 *P.*

44 सुस्निग्धगंभीर, very sweet and deep.

कल्याणी, a woman with auspicious marks on her person.

ते aught to be तव, as it follows a vocative.

हसिष्यति पंकजश्रीः the beauty of lotuses will be unfolded to view.

द्विरेफः an ephithet applied to भ्रमर or bee, on account of two र's or रेफs contained in the word 'भ्रमर'.

45 कामं (*n.* as also *m.*), an object of desire; or as an adverb, it may mean 'joyfully,' 'willingly.

विदर्भान् यदि यात्वाद्य सूर्यं दर्शयितासि मे, if today, on reaching विदर्भ, you will show me the sun, *i. e.* if you will take me to विदर्भ before sunset.

शद्—*causal,* शातयति he fells and शादयति he drives.

मेघनिर्घोष—having a voice like the thunder of a cloud.

चामीकरप्रख्य, having the glare of gold, blazing.

आ-धा 3 *U,* to impute, ascribe.

नियुक्त, enjoined.

मच्चित्त, with the heart fixed on me.

Shall not survive you, तव पश्चात् न जीविष्यामः, त्वां नातिजीविष्यावः

You have made me lament the death of my son,—त्वयाहं पुत्रनिधनदुःखमनुभावितः

You shall share the same fate (with me), तदेव-फलं त्वामुपस्थास्यति, तव भविष्यति,—निपतिष्यति.

Pay, वेतनम्, भृति *f.*

In due course, यथाकालम्.

Rescue me from the hands of रावण, रावणहस्तगतां मां मोचय.

Injurious only to कलि, कलेरेवपीडाकरम्.

To sacrifice one's life, जीवितं त्यज् 1 *P.*

46 स्थिरोद्यम, steady, persevering in efforts.

47 प्रसन्न, clear, free from dirt.

48 कथाप्रबन्धः विच्छेदमाप, the composition of the story met with, or suffered, a break.

पुरंदरपुरम्, the capital of इन्द्र, here used to denote the place reached by persons after death.

निगृहीत, checked.

49 उत्सद्, 1 *P*. to go to ruin.
मातरिश्वन् *m*., the wind.
मरुत् *m*., a god or wind.
50 निर्घृणम् *adv*. ruthlessly.
51 नवमल्लिका, a kind of flowering creeper.
विप्रकृत, teased, troubled.
चेतन, animate.
इनकान्त, dear to the sun, *i. e*., the sunstone, emitting fire at the touch of the rays of the sun.
भू *cau*., to enable to live, to support, maintain.
प्रतारणा, deception.
व्यतिक्रमः, omission, neglect.
प्रसादः, composure of mind.
यत्नमास्थितः, making efforts.
शब्दब्रह्मन् *n*., the Vedas.
71 निभृत, concealed.
तस्य तत्र स्थितस्य, while he stayed there.
यावत्पश्यति तावत्, as he saw.
समयः, agreement or custom.
आह्वे *cas*., to invite.
समायातस्यास्य सदाह्वानं करोति, calls him on his arrival, every day.
तूष्णीम् *ind*., silently, still.
